Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 5 | ISSN : 2582-0095

# गृहप्रवेशविचारः

**प्रो.प्रभातकुमारमहापात्रः**
**ज्योतिषविभागाध्यक्षः, श्रीरणवीरपरिसरः, जम्मूः**

**Article Info**
Volume 4 Issue 5
Page Number : 211-236
**Publication Issue :**
September-October-2021
**Article History**
Accepted : 01 Sep 2021
Published : 15 Sep 2021

**शोधसारांशः-** प्रवेशकाले नक्षत्रस्य शुभाशुभज्ञानाय सूर्यनक्षत्रतः चन्द्रनक्षत्रं यावत् गणयित्वा कुम्भचक्रस्य निर्माणं क्रियते। अर्थात् प्रवेशकालिकलग्नचक्रे सूर्यचन्द्रौ कस्मिन् नक्षत्रे स्थितौ स्तः इति द्रष्टव्यं भवति। तत्र कुम्भचक्रे घटस्य मुखाद्यवयवानां चिन्तनमपि भवति। तद्यथा यदि सूर्यनक्षत्रात् चन्द्रनक्षत्रं प्रथमं नक्षत्रं भवति। अर्थात् सूर्यनक्षत्रमेव गृहप्रवेशस्य चन्द्रनक्षत्रं स्यात्तदा नक्षत्रं घटस्य मुखे चिन्तयेत् । तस्य फलम् अग्निदाहो भवति। तदग्रिमानि चत्वारि नक्षत्राणि घटस्य पूर्वे चिन्तयेत्, तस्य फलं प्रवासः स्यात्। तदनन्तरं चत्वारि नक्षत्राणि ( सूर्यनक्षत्रः चन्द्रनक्षत्रं यदि षड्संख्यातः नव संख्यां यावत् स्यात्तदा ) घटस्य दक्षिणभागे कल्पयेत्, तस्य फलं लाभः। ततः अग्रिमचत्वारि नक्षत्राणि ( दशसंख्यातः त्रयोदशसंख्यां यावत् ) कुम्भस्य पश्चिमे कल्पयेत् तत्र प्रवेशनक्षत्रे सति धनप्राप्तिं विजानीयात्। तदग्रिमचत्वारि नक्षत्राणि (यदि सूर्यनक्षत्रतः चन्द्रनक्षत्रं यदि चतुर्दशसंख्यातः सप्तदशसंख्यामध्ये स्यात्तदा ) कुम्भस्योदरे चिन्तयेत् यस्य फलं गृहविनाशः भवेत्। कुम्भस्य गुदाभागे ( निम्नस्थाने ) तदग्रिमाणि नक्षत्राणि कल्पयेत् । तत्र प्रवेशनक्षत्रे सति फलं गृहस्य स्थिरत्वं भवति, कुम्भस्य कण्ठे तदग्रिमाणि त्रीणि नक्षत्राणि परिकल्पयेत् । तत्र प्रवेशनक्षत्रे सति नित्यं गृहस्य स्थैर्यं जानीयादिति भावः।

**मुख्यशब्दाः-** गृहप्रवेशविचारः,गृहविनाशः,विधिः,कालशुद्धिः,शुभः,ज्ञापकः,अर्थलाभः।

वास्तुशास्त्रे सर्वप्रथमं भूमिचयनं कृत्वा तदनन्तरं गृहारम्भः तदनु गृहप्रवेशः भवतीति सर्वत्र प्रसिद्धमस्ति । निश्चयेन गृहप्रवेशकालोऽतीवमहत्वपूर्णो भवति । गृहप्रवेशशब्दश्रवणमात्रेण जिज्ञासेयं जायते यद् गृहप्रवेशः कदा कर्तव्यः ? गृहप्रवेशस्य विधिः कः ? इत्यादयः अनेके प्रश्नाः उत्पद्यन्ते । गृहप्रवेशकाले या कालशुद्धिः अपेक्षते अध्यायेऽस्मिन् तस्य विस्तृतविवेचनं तथा कलशवास्तुचक्रम्, वामरविविचारः, वास्तुपूजनविधिश्च वर्तते ।

**नूतनगृहप्रवेशे कालशुद्धिः**

**सौम्यायने ज्येष्ठातपोऽन्त्यमाधवे**
**यात्रानिवृत्तौ नृपतेर्नवे गृहे।**
**स्याद् वेशनं द्वाःस्थमृदुध्रुवोडुभि -**
**र्जन्मर्क्षलग्नोपचयोदये स्थिरे ॥1॥**[1]

1. मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**मासवशात् गृहप्रवेशे कालशुद्धिः**

**अथ प्रवेशो नवसद्मनश्च कार्य नववेश्मप्रवेशनम्। राज्ञां यात्रानिवृत्तौ वा।इति।**[2]

केवलायां भूमौ क्रीतायां प्राप्तायां वा स्वतः सिद्धायां वोत्थापितं गृहं नूतनमित्युच्यते। ज्येष्ठेति। माघफाल्गुनवैशाखमासेष्वेव सत्यप्युत्तरायणे प्रवेशनं शुभम्।

**यदाह नारदः -**

**माघफाल्गुनवैशाखज्येष्ठामासेषु शोभनः।**

**प्रवेशो मध्यमो ज्ञेयः सौम्यकार्त्तिकमासयोः॥इति।**[3]

**चान्द्रमासफलानि गृहप्रवेशे -**

**माघेऽर्थलाभः प्रथमप्रवेशे पुत्रार्थलाभः खलु फाल्गुने च।**

**चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे पशुपुत्रलाभः॥**

**ज्येष्ठे च मासेषु पुरेषु नूनं हानिप्रदः शत्रुभयप्रदश्च।**

**शुक्ले च पक्षे सुतरां विवृद्ध्यै कृष्णे च यावद्दशमी च तावत् ॥**[4]

इत्याद्युक्तेरेव ग्रन्थकृता पक्षविशुद्धिर्नोक्ता। तिथिवारशुद्धिश्चाग्रे वक्ष्यते।

सौरमानं गृहप्रवेशे न ग्राह्यम् –

**वसिष्ठेन तु गृहप्रवेशे सौरमानमनूद्य दूषितम् यथा -**

**मृगादिषड्राशिषु संस्थितेऽर्के नवप्रवेशः शुभदः सदैव।**

**कुम्भं विनान्येष्वपि केचिदूचुर्न सौरमिष्टं खलु सन्निवेशे ॥इति॥**[5]

अस्यार्थः – नूतनगृहप्रवेशो मकरादिषड्राशिसंस्थिते सूर्ये शुभफलदो भवति। तत्रापि माघादिषु विहितेषु चतुर्षु मासेषु शुभः।

**कुम्भे फाल्गुनपौर्णिमोत्तरं सर्वथा प्रवेशो न कार्यः -** ननु अथ प्रवेशो नवसद्मनन्द्रा सौम्यायने इति स्वयं प्राक् सौम्यायन इत्युक्तत्वात् किमित्यत आह – कुम्भ विनेति। सत्यप्युत्तरायणे कुम्भसङ्क्रान्तौ नूतनगृहप्रवेशो न भवतीत्येतदर्थः। नन्विदं पूर्वापरविरुद्धम्। तथाहि–माघेऽर्थलाभः प्रथमप्रवेश इत्यादिना माघफाल्गुनयोश्चान्द्रमासयोः शुभफलाभिधानात् तत्रैव च कुम्भसङक्रान्तिसद्भावाद् द्वयोरन्यतरस्याशुभत्वं प्रतिपाद्यते। उभयमासनिर्मुक्तः कुम्भस्तु नास्त्येवेति चेत्। सन्ति हि द्विविधा मालाश्चान्द्रमासाः शुक्लालयः कृष्णादयश्चेति। तत्र फाल्गुनपूर्णिमोत्तरमासस्य कृष्णादिमासगणनाय चैत्रत्वात्तस्य च विरुद्धफलत्वात्तद्विषयकोऽयं कुम्भसङ्क्रान्तिनिषेधः। चान्द्रमासस्य शुक्लादिकृष्णाद्यभिधायकानि वाक्यानि गृहारम्भप्रकरणेऽस्माभिरुक्तानि। अयमपि निषेधो मासस्य कृष्णादित्वे ज्ञापकः।

2.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

3. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

4.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

5.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

**सुपूर्वगृहप्रवेशः तृणागारप्रवेशो वा कर्कादिषड्राशिषु -** कर्कादिसङ्क्रान्तिषप मतान्तरमाह – अन्येष्वपीति। केचिताचार्या अन्येष्वपि कर्कादिषड्राशिस्थिते सूर्येऽपि नवगृहप्रवेशः कार्य इत्यूचुः। तदेतद् द्वन्द्वसौपूर्विकगृहप्रवेशविषयम्।

**तदुक्तं स्वयमेव -**

**नवप्रवेशो त्वथ कालशुद्धिर्न द्वन्द्वसौपूर्विकयोः कदाचित्।इति।**

**नूतनतृणागारप्रवेशविषयं वा तदुक्तं ज्योतिः प्रकाशे -**

**गृहारम्भोदितैर्मासैर्धिष्ण्यैर्वैरैर्विशेद् गृहम्।**
**विशेत्सौम्यायने हर्म्यं तृणागारं तु सर्वदा ॥इति।**[6]

**अत एव –** **कुलीरकन्यकाकुम्भे दिनेशे न विशोद् गृहम्।**
**ग्रामं वा नगरं वापि पत्तनं वा सुराधिप॥**[7]

**इति गुरुवाक्यमप्येवमेव व्याख्येयम्।**

**विरुद्धफलयोः सौरचन्द्रमासयोः चन्द्रमासेन नवगृहप्रवेशः कार्यः -**

पौषचैत्रादिषु विरुद्धफलेषु चान्द्रमासेषु विहितसङ्क्रान्तिश्चेत् तदा नूतनगृहप्रवेशः कार्यो वा न वेत्यत आह –न सौरमिति। खलु निश्चयेन। सौरं मानं सन्निवेशे गृहप्रवेशे नेष्टं न शुभफलदम्। विरुद्धशुभफलयोश्चानद्रसौरमासयोः साहित्ये विहितचान्द्रमासैरेव गृहप्रवेशः कार्य इत्यपलमितिप्रसङ्गेन।

**अन्यमतैः सह तुलना –**

**पूर्वकालामृतानुसारेण –**

**वैशाखे बहुपुत्रदश्च शुभदो ज्येष्ठेऽर्थदः फाल्गुने,**
**माघे धान्यसुखप्रदो गृहपतेर्मासो प्रवेशो भवेत्।**
**आदित्ये मकरादिषट्सुसहिते कुम्भाख्य मासं विना,**
**सर्वाभीष्टद इत्यथाहूरपरे शेषेष्वयं दुःखदः ॥41॥**[8]

सम्प्रति गृहप्रवेशकालम् आश्रित्य किमपि विचार्यते। तत्र वास्तुग्रन्थेषु अथच अत्रापि मुहूर्त्तचिन्तामणौ वास्तुप्रकरणे गृहप्रवेशस्य मुहूर्त्तः विचिन्तितः रामाचार्येण। उत्तरायणे ज्येष्ठमासे, फाल्गुनमासे, माघमासे एवं वैशाखे एतेषु मासेषु सूर्ये सति गृहं प्रविशेत्। माघे गृहप्रवेशे सति अर्थलाभः , प्रथमप्रवेशे फाल्गुने पुत्रार्थलाभः भवति, चैत्रे अर्थहानिः, निर्धन-धान्यलाभः वैशाखमासे भवति इति। एवं क्रमेण चान्द्रमासम् आश्रित्य गृहप्रवेशस्य फलं वर्णयति वशिष्ठः। तमेव मतमनुपालयति पूर्वकालामृतकारोऽपि। एतत् अतिरिच्य सौरमासम् आधृत्यम् अपि प्रवेशमुहूर्त्त विद्यते तत्र प्रायः मकरादि षड् राशिषु सौरमासेषु अर्थात् उत्तरायणे शुभफलम् उक्तं वर्त्तते। अथच दक्षिणायने कर्कादि षड् राशिषु अशुभफलम् । तत्रापि वशिष्ठस्य मतं भवति यत् यदि सुपूर्वगृहं प्रविशेते कोऽपि अर्थात् यस्मिन् गृहे पूर्वमेव कोऽपि आसीत् तस्मिन् गृहे यदि कोऽपि प्रविशति चेत् पूनः

6.उद्धतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

7.उद्धतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

8. पूर्वकालामृतम्,वास्तुप्रकरणम्,श्लो.सं.41

यथा अस्माभिः भाटकगृहादिषु प्रवेशः क्रियते तर्हि अस्यां स्थितेः तु दक्षिणायने अपि प्रवेशः स्यात्। किन्तु तत्र अन्यानि नक्षत्रादिनि तु तावत् यथा पूर्वोक्तानि शुभावहानि तानि एव स्वीकरणीयानि।

**नक्षत्रवशात् गृहप्रवेशे कालशुद्धिः**

**प्रवेष्टव्याद्वाराभिमुखदिङ्नक्षत्रैः गृहप्रवेशनं कार्यम् -**

**यदाह वसिष्ठः -**

**"यद्दिग्द्वारं मन्दिरं यद्दिगृक्षैरक्तर्क्षैः स्यात् सम्प्रवेशो न सर्वैः "॥ इति।[9]**

**त्रिविधप्रवेशे नक्षत्राणि विना पुष्यधनिष्ठाशततारकाः -**

**उक्तर्क्षाण्याह स एव –**

**चित्रोत्तराधातृशशाङ्कमित्रवस्वन्त्यवारीश्वरभेषु नूनम्।**
**आयुर्धनारोग्य सुपुत्रपौत्रसत्कीर्तिदः स्यात् त्रिविधः प्रवेशः ॥इति।[10]**

**नारदोऽपि -**

**वस्विज्यान्त्येषु वरुणत्वाष्ट्रमित्रस्थिरोडुषु।**
**शुभः प्रवेशो देवेज्यशुक्रयोर्दृश्यमानयोः ॥इति।[11]**

**पुष्यधनिष्ठाशततारकाः जीर्णगृहप्रवेशे एव न नूतने -**

अत्र पुष्यधनिष्ठाशततारकाग्रहणं जीर्णगृहप्रवेशविषयम्।

**उक्तञ्च ज्योतिप्रकाशे**

**प्रवेशो नूतने हर्म्ये ध्रुवैर्मैत्रैः सुखाप्तये।**
**पुष्यस्वातीयुतैस्तैश्च जीर्णे स्याद्वासवद्वये ॥इति॥[12]**

**शुभाशुभफलानि प्रवेशनक्षत्रेषु -**

**अमुमेवाश्यां मनसि निधायह श्रीपतिः -**

**शुभः प्रवेशो मृदुभिर्ध्रुवाख्यैः क्षिप्रैश्चरैः स्यात् पुनरेव यात्रा।**
**उग्रैर्नृपो दाररुणभैः कुमारो राज्ञी विशाखासु विनाशमेति ॥**
**कृत्तिकासु भवनं कृशानुना दह्यते प्रविशतां न संशयः।**
**यन्मुखं च सदनं हि तत्ककुब् द्वारेभेषु शुभकृत् प्रवेशनम् ॥इति।[13]**

**वसिष्ठोऽपि -**

---

9. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
10.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
11.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
12.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
13.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

**अर्कानिलेयादितिदस्रविष्णुऋक्षे प्रविष्टं नवमन्दिरं यत्।**

**अब्दत्रयात्तत्परहस्तयातं शेषेषु धिष्ण्येषु च मृत्युदं स्यात् ॥इति।**[14]

सम्प्रतिप्रवेशे नक्षत्रस्य निर्धारणं क्रियते रामदैवज्ञेन अत्र आदौ मासस्य सौरचान्द्रमासयोः चर्च्चा तेन विहिता तदनु कस्मिन् नक्षत्रे गृहप्रवेशः शुभप्रदः स्यात् इति विषदयति । तदनुसारेण यात्राप्रकरणे उक्तं यत् परिघचक्रं विद्यते तस्मिन् परिघचक्रे कृतिकादि क्रमेण सप्त सप्त नक्षत्राणि चतुर्षु दिक्षु स्थाप्यन्ते। तदेव परिघचक्रम् अत्रापि प्रवेशनिर्णये अपि उपयोगी इति रामाचार्यः उक्ति। तदनुसारेण यत् दिशि प्रवेशोः विधेयः प्रत्यकस्मिन् गृहे द्वाराणि भवन्ति द्वारमेव प्रविशति। तर्हि कं द्वारं प्रविशेत् चेत् शुभप्रदं स्यात् इत्यस्य निर्णयं तु तावत् तत् द्वारं यस्मिन् दिशि विद्यते तस्मिन् दिशि यानि नक्षत्राणि सप्त सप्त निर्मितानि सन्ति परिघचक्रानुसारेण तेषु सप्त सप्त चक्रेषु मृदु संज्ञकम्, ध्रुवसंज्ञकम् च नक्षत्रं यत् विद्यते तस्मिन् नक्षत्रे एव तं द्वारं प्रविशेत् जातकः इति  रामाचार्यः उक्ति। रामाचार्यस्य यन् मतं विद्यते तद् वस्तुतः मुहूर्तकल्पद्रुमे तथैव अस्माभिः अवलोक्यते। त्रिविधाः प्रवेशः सुपूर्वःअपूर्वः एवं द्वन्द्व इति त्रिविधः प्रवेशः उक्तः। खलु तेषु अन्यतमे प्रवेशः चिन्तने चित्रा,अनुराधा,मृगशिरा,रेवती,उत्तरात्रयःरोहिणी, धनिष्ठा, शतभिषा नक्षत्रेषु  अन्यतमे नक्षत्रे यदि कोऽपि प्रविशति चेत् तत् शुभप्रदं भवति। आयुः आरोग्यं लभते पुत्रपौत्रादिकं अर्जयति कीर्त्तिं च विन्दति इति एतेषां नक्षत्राणां फलं वशिष्ठेन उक्तम्। पुनश्च पुष्यस्वातीः युतैः जीर्णेस्यात् तत्र ज्योतिषप्रकाशकारः पुष्यस्य अन्वयं तु करोति परन्तु तत्र अन्येषां नक्षत्राणां नाम न परिगणति प्रत्युत स्वाती नक्षत्रस्य उल्लेखं करोति ज्योतिषप्रकाशकारः। एतत् अतिरिच्य गोविन्दः परहस्तगतगृहस्य फलं वक्ति। तदर्थम् असौ तानि नक्षत्राणि अपि लिखति येषु नक्षत्रेषु प्रवेशे शति गृहं परहस्तगतं भवति। अत्र असौ वशिष्ठस्य मतम् उपस्थापयति वशिष्ठमतानुसारेण हस्तः स्वाती, पुष्यः, पुनर्वसः, अश्विनी, श्रवणः नक्षत्रेषु नूतनगृहे यद्यपि प्रवेशं शुभप्रदं भवति परन्तु वर्षत्रयाभ्यान्तरे एतत् गृहं परहस्तगतं भवति। पूर्वोक्तनक्षत्राणि अतिरिच्य अन्येषु नक्षत्रेषु यदि गृहप्रवेशः क्रियते चेत् तत् तु अत्यन्तंअशुभप्रदं भवति इति वशिष्ठः वक्ति। परन्तु अत्र रत्नमालायाम् इदं स्पष्टयति यत् नूतनगृहे प्रवेशात् परहस्तगतं तत् गृहं भवति वा न एतेषु नक्षत्रेषु। अतः रत्नमालाकारस्य मतमपि तथैव अस्माभिः स्वीकरणीयम् यत् एतेषु नक्षत्रेषु जीर्णगृहे तु प्रवेशं शुभं भवति किन्तु नूतनगृहप्रवेशः न शुभप्रदः। एवमेव पूर्वकालामृतकारः अपि तथैव वक्ति यत् हस्तः,पुनर्वसु, स्वाती, अश्विनी नक्षत्रेषु यदि कोऽपि नूतनं गृहं प्रविशति चेत् इदं तत् परहस्तगतं भवति। पुनश्च चित्रा अनुराधा धनिष्ठा,उत्तरात्रय, रेवती ,शतभिषा रोहिणी मृगशिरा नक्षत्रेषु प्रवेशः शुभप्रदः अथच पुष्ये मध्यमफलं प्रदः भवति इति पूर्वकालामृतकारोऽपि वदति अनेन प्रायः अयं निकृष्टार्थः यत् नक्षत्राधारितं गृहप्रवेशं मुहुर्त्तनिर्धारयितुं वस्तुतः वशिष्टस्येव मतं साधु विद्यते। वशिष्ठस्येव मतं विश्वकर्मापि अनुपालयति पुनश्च परवर्तिनः आचार्याः ते अपि तथैव स्वीकुर्वन्ति।

**गृहप्रवेशे लग्नानि –**

प्रवेशलग्नान्यह –दन्मर्क्षेति। जन्मराशिः जन्मलग्नं प्रसिद्धम्। ताभ्यामुपचये तृतीयषष्ठैककादशमस्थेऽन्येषु तथा स्थिराख्यराशिषु लग्नगतेषु नवगृहप्रवेशनं शुभम्।

**यदाह वसिष्ठः -**

**कर्त्तुर्विलग्नादथ जन्मराशेर्लग्नस्थितो राशिरिति प्रवेष्टः।**

**निर्व्ययाधिदारिद्र्ययशस्कश्च सुदृत्सुतघ्नो रिपुनाशनश्च।**

**कलत्रहन्ता निधनप्रदश्च रोगप्रदः सिद्धिकरोऽर्थदश्च।**

---

14.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1

**क्रमाच्च वैरामयदः क्रमेण सदैव नूनं विविधः प्रवेशः ॥इति।**[15]

**अतो निष्कृष्टमर्थमाह गृहप्रवेशे राजमार्त्तण्डः –**

**कर्तृभोपाचयगाश्च विललग्ने राशयः शुभफलाय भवन्ति इति।**[16]

**नारदोऽपि -**

**कर्तुर्जन्मभलग्ने वा ताभ्यामुपचयेऽपि वा।**

**प्रवेशलग्ने स्याद् वृद्धिरन्यभे शोकनिःस्वनः ॥ इति।**[17]

**पुनर्वसिष्ठः –**

**सौम्ये स्थिरे भे शुभदृष्टियुक्ते लग्नेऽथवा द्व्यङ्गगृहे विलग्ने इति।**[18]

सौम्ये सौम्यगृहयुक्ते। द्व्यङ्गगृहे द्विस्वभावराशौ। अत्र विवाहप्रकरणोक्ता एकविंशति – महादोष वर्ज्या इत्यापि ध्येयम्।

**एकविंशतिदोषानुक्रम्य वसिष्ठेनोक्तं -**

**कर्त्तुर्नाशो गृहारम्भे प्रवेशे पतिनाशनम्। इति।**[19]

**विश्वकर्मप्रकाशे –**

**व्याधिहा धनहा चैव वित्तदो बन्धुनाशकृत्।**

**पुत्रहा शत्रुहा स्त्रीघ्नः प्राणहा पिटकप्रदः ॥25॥**

**सिद्धिदो धनदश्चैव भयकृज्जन्मराशितः।**

**लग्नस्थ क्रमतः राशिर्जन्मलग्नात् प्रवेशने ॥26॥**[20]

**पूर्वकालामृते –**

**संवेशः शुभदः स्वजन्मनि गृहे लग्ने चतुर्थालये,**

**ताभ्यां चोपचये क्रमात्पलमिदं कर्तुः स्वजन्मादिषु।**

**निर्व्याधिं च दारिद्रकीर्तिसुहृदो निष्पुत्र निः शत्रुतां,**

**निर्जायं निधनामय स्थिरधनद्वेष्यान्प्रद्यात्सदा ॥48॥**[21]

**वास्तुतत्त्वविचारे -**

---

15. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
16. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
17. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
18. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
19. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.1
20. श्रीविश्वकर्मप्रकाशः,दशमोऽध्यायः,श्लो.सं.25–26
21 . पूर्वकालामृतम्,वास्तुप्रकरणम्,श्लो.सं.48

**निन्दिता अपि शुभाशंसमेतास्तौमेषमकराः सकुलीराः।**
**कर्तुरौपचयगाश्च विलग्ने राशयः शुभफलाश्च भवन्ति ॥**[22]

**गृहवास्तुप्रतदीपामुसारं –**

**नैरुज्यदारिद्र्यविभूतिकारी**
**बन्ध्वात्मजदि कलत्रघाती।**
**प्राणापहारी कलहप्रदश्च**
**सिध्यर्थदौ भीतिकरः क्रमेण ॥94॥**[23]

गृहप्रवेश मुहूर्तेषु अन्यतमः भवित लग्नविचारः। रामाचार्यः लग्नं निर्धारयन् वक्ति यत् जन्मराशितः अथवा जन्मलग्नात् उपचयराशिषु यदि लग्नेशः स्यात् अथवा जन्मराशितः जन्मलग्नात् उपचयराशिषु 3,6,10,11 राशिषु अन्यतमः राशिः लग्नरुपेण स्यात् अथवा वृषः,सिंहः,वृश्चिकः,कुम्भराशयस्युः तर्हि गृहप्रवेशः शुभप्रदः भवति। स्थिरलग्नं भवेत् अथवा जन्मलग्नात् उपचयराशिः लग्नं स्यात् नारदस्यापि मतम् इदमेव विद्यते। तत्रापि मतं वैषम्यं न दृश्यते प्रायः सर्वेपि आचार्याः अस्मिन् विषये वशिष्ठनारदयोः मतमेव स्वीकुर्वन्ति। अत्र किञ्चित विशिष्टं उक्तिं भवति यत् यदि स्थिरलग्नं नास्ति द्विस्वभावलग्ने शुभग्रहास्यात् अथवा शुभग्रहस्य दृष्टिः लग्नस्योपरि स्यात् चेत् प्रवेशः शुभप्रदः भवति। एतददतिरिच्य आचार्याः प्रत्येके लग्ने प्रविशस्य फलं किमिति उपस्थापयति । द्वितीये अर्थात् जन्मलग्नात् जन्मराशेः वा द्वितीयं लग्नं प्रवेशकालिनलग्नं भवति । विश्वकर्मा अपि तथैव वदति असौ धननाशः इति शब्दं प्रयुक्ते। तृतीये यशोवृद्धिः धनवृद्धिश्च फलं सूचयति । एवमेव जन्मलग्नात् चतुर्थे मित्रनाशः इति सर्वे स्वीकुर्वन्ति। पञ्चमे पुत्रनाशः, षष्ठेशत्रुनाशः, सप्तमे स्त्रीनाशः अथच अष्टमे मृत्युः अथवा मृत्युतुल्यं कष्टं सर्वेपि आचार्याः स्वीकुर्वन्ति। ततः नवमे रोगाधिक्यः व्रणादिकमपि भवति। ततः दशमे सिद्धिप्रदं भवति प्रवेशः। एकादशे धनलाभः एवं द्वादशे शत्रु रोगयोः आधिक्यम् । एतत् अतिरिच्य गृहप्रवेशः मुहूर्तनिर्धारणसमये एकविंशतिः ये दोषाः विवाहः मुहूर्त्तनिर्धारणकाले विचिन्त्याह ते अत्रापि विचिन्त्याह।

**जन्मराशितः जन्मलग्नतः द्वादशराशिगतगृहप्रवेशलग्नस्य फलम् –**

| **लग्नः** | **फलम्** |
|---|---|
| प्रथमः | व्याधिनाशः |
| द्वितीयः | धननाशः |
| तृतीयः | धनदायकः |
| चतुर्थः | मित्रनाशः |
| पञ्चमः | पुत्रनाशः |

22. वास्तुतत्वविचार,पृ.सं.258
23. गृहवास्तुप्रदीपःगृहप्रवेशलग्नफलम्,श्लो.सं.94

| | |
|---|---|
| षष्ठः | शत्रुनाशः |
| सप्तमः | स्त्रीनाशः |
| अष्टमः | प्राणनाशः |
| नवमः | स्फोटकादयः |
| दशमः | कार्यसिद्धिः |
| एकादशः | धनलाभः |
| द्वादशः | अशुभफलम् |

**जीर्णगृहप्रवेशे कालशुद्धिः**

**जीर्णे गृहेऽग्न्यादिभयान्नवेऽपि**
**मार्गोर्जयोः श्रावणिकेऽपि सत् स्यात्।**
**वेशोऽम्बुपेज्यानिलवासवेषु**
**नावश्यमस्तादिविचारणाऽत्र॥2॥**[24]

जीर्णे पुरातनेऽन्यार्मिते गृहेऽथवा सिद्धे एव गृहेऽग्न्यादिभयादग्निकृतं भयं दाहः आदिशब्देन बहुवृष्टिपातभ्यं राजाकोपो वा इत्याद्युपद्रवैः पतिते गृहे पुनरपि सम्यक् नवे कृते उत्थापिते गृहेऽपि प्राक्पद्योक्ताः सर्वेऽपि मासस्तादृशगृहप्रवेशे ध्येयाः। किञ्च मार्गोर्जयोः मार्गशीर्षकार्त्तिकयोश्च श्रावणिकेऽपि श्रावणे मासि प्रवेशः शुभफलदः स्यात्। श्रावणे तु स्यन्नभाः श्रावणकश्च सः इत्यमरः।

**यदाह सनत्कुमारः -**

**गृहारम्भोदितैर्मसौर्धिष्ण्यैर्वैरैर्विशेद् गृहम् ॥इति।**[25]

**गृहारम्भोक्ता मासाः जीर्णन्यनिर्मितगृहप्रवेसशेषु -**

**अत्र सामान्यतो गृहारम्भोदिता मासा गृहप्रवेशेऽभिहिताः।**
**ते चेमे सोम्यफाल्गुन –वैशाखमाघश्रावणकार्तिकाः।**
**मसाः स्युर्गृहनिर्मात्रे पुत्रारोग्यधनप्रदाः इति नारदोक्ताः**[26]

मार्गशीर्षफाल्गुनवैशाखमाघश्रावणकार्तका विहिताः। श्रावणकार्त्तिकमार्गशीर्षाणाम् उत्तरायणत्वाभावाद्विरोधने नूतनजीर्णगृहप्रवेशाभ्यां व्यवस्था। गृहारम्भोदितैर्मासैः इत्यनेन तु सामान्यतस्त्रिविधस्यापि गृहप्रवेशस्याभिधानादुत्तरायणीया

24. मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2
25.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2
26.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2

मासास्त्रिविधगृहप्रवेशो शुभः। दक्षिणायनीया मासाः श्रावणादयस्तु जीर्णगृहप्रवेशविषयाः। अत एव मार्गशीर्षः कार्तिकयोर्नूतनगृहप्रवेशो मध्यमत्वामाह। अर्थादेव जीर्णगृहप्रवेशे उत्कृष्टत्वमध्यवस्यते।

**जीर्णप्रवेशो निषिद्धर्क्षाणि यानि तान्येवैतानि नवे शुभानि -**

अम्बुपः शततारका, इज्यः पुष्यः, अनिलः स्वाती, वासवं धनिष्ठा ,एष्वपि भेषु गृहेऽग्न्यादिभयान्नवेऽपि गृहे प्रवेशः शुभः।

**तदुक्तं ज्योतिः प्रकाशे -**

**प्रवेशो नूतने हर्म्ये ध्रुवैर्मैत्रैः सुखाप्तये।**
**पुष्ये स्वातियुतैस्तैश्च जीर्णे स्याद्वासवद्वये॥इति।**[27]

**जीर्णगृहन्यतर गृहप्रवेशेऽस्तादिदोषो न -**

अत्रैवविधे जीर्णे गृहोऽग्न्यादिभयान्नवेऽप्यवश्यमस्तादिविचारणा शुक्रागुर्वस्तबाल्य–वार्द्धक्यसिंहमकरस्थगुरुलुप्तसंवत्सरादीनां दोषाणां विचारो नास्ति। तथापि गृहप्रवेशः कार्यः। परन्तु सोऽपि यथाकथञ्चित् पञ्चाङ्गशुद्धिमात्रमङ्गीकृत्य विहितनक्षत्रेष्वेव कार्यः।

**त्रिविधप्रवेशेऽपि वास्तुपूजा कार्यैव -**

वास्तुपूजा त्वेवविधे गृहप्रवेशे भवतीत्यपि ध्येयम्।

**तदुक्तं ज्योतिः प्रकाशे -**

**नित्ययाने गृहे जीर्णे प्राशने परिधानके।**
**वधूप्रवेशे माङ्गल्ये न मौढ्ये गुरुशुक्रयोः ॥इति।**[28]

**वसिष्ठोनाप्युक्तम् –**

**नवप्रवेशे त्वथ कालशुद्धिर्न द्वन्द्वसौपूर्विकयोः कदाचित्। इति अस्यार्थः।**[29]नूतनगृहप्रवेशे कालशुद्धिविचार्या। द्वन्द्वं द्वन्द्वोभयाख्यो गृहप्रवेशः। सौपूर्विको राज्ञो यात्रासमाप्तौ गृहप्रवेशः। तादृशयोर्गृहप्रवेसयोः कालशुद्धिः कदाचिदपि नापेक्षिता। सति सम्भवे सुखेनास्तु, किन्तु प्रवेशादिनीयपञ्चाङ्गशुद्धिसहिते सुलग्ने गृहप्रवेशः कार्यः। पूर्वस्मिन्नाद्ये नूतने प्रवेशे यथा वास्तुपूजा तथा द्वन्द्वसौपूर्विकयोरपि कार्येत्यर्थः। नारदस्तु यात्रानिवृत्तिप्रवेशे कालशुद्धिरपेक्षितैवेत्याह। तद्वाक्यं प्रागभिहितम्। तदेतयोर्वाक्ययोरावश्यकनावस्यकत्वेन व्यवस्था।

**प्रवेशत्रयस्यापि लक्षणानि -**

**त्रयाणां गृहप्रवेशानां लक्षणमुक्तं वसिष्ठेन -**

**अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने तु सुपूर्वसंज्ञाः।**

27.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2

28.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2

29. उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2

**द्वन्द्वाभयस्त्वाग्निभ्यादिजातः प्रवेश एवं त्रिविधः प्रदिष्ठः।इति।।**[30]

एतद् व्याख्यानं यात्रानिवृत्ताविति पद्यव्याकृतावस्ति। तत एवावधार्यम्।

**सर्वप्रवेशे क्रूराक्रान्तविद्धनक्षत्राणि वर्ज्यानि -**

अत्रेदं ध्येयम्। यत् त्रिविधेऽपि प्रवेशे प्रवेशदिनीयनक्षत्रं क्रूरविद्धं वा तत्सर्वथा वर्ज्यमिति।

**उक्तञ्च –**

**क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे इति।**[31]

सम्प्रति जीर्णगृहस्य प्रवेशमुहूर्तं वक्ति रामाचार्यः। अत्र असौ प्रवेशकालिकः मासान् उल्लिखति अथच नक्षत्राणि च वक्ति तदनुसारेण कार्तिकः, मार्गशीर्षः, श्रावणः , माघः, वैशाखः, ज्येष्ठः मासेषु जीर्णगृहप्रविशेत् जनः अस्यैव मतस्य व्याख्यायां गोविन्दः सनत्कुमारस्य नारदस्य च मतम् उपस्थापयति। तत्र सनत्कुमारस्य इदं मतं यत् यस्मिन् मासे नक्षत्रे वारादौ च गृहारम्भः कृतः तस्मिन् नक्षत्रे मासे वारे च गृहप्रवेशः शुभप्रदः इति सनत्कुमारः वक्ति। अतः एतस्मात् भिन्नम् नारदः वक्ति यत् मार्गशीर्ष – फाल्गुन– वैखाख – माघ – श्रावण – कार्तिक– मासेषु यदि जीर्णगृहं प्रविशति चेत् इदं पुत्रारोग्यधनप्रदायकम्। अत्र यदि विचारयामः चेत् नारदस्य मतं मुहूर्त्तचिन्तामणिकारात् किञ्चित् भिन्नं विद्यते यतोहि नारदः फाल्गुनः श्रावणमासयोः अपि ग्रहणं करोति। नारदस्येव मतम् अनुसरति गृहप्रवेशकुसुमकारस्य असावपि श्रावण – कार्तिक – मार्गशीर्ष – मासानां ग्रहणं करोति पूर्वोक्तान् मुहूर्त्तचिन्तामणिकारोक्त मासान् अतिरिच्य।

एतत् अतिरिच्य यथा मया उक्तं यत् मुहूर्त्तचिन्तामणिकारः जीर्णगृहप्रवेशे कानि नक्षत्राणि तेषाम् अपि वर्णनं करोति। वस्तुतः एतानि नक्षत्राणि तु गोविन्दः पूर्वमेव प्रास्तौत उदलेखित् तत्र प्रसङ्गे गृहप्रवेशकालिकनक्षत्र प्रसङ्गे किन्तु कदाचित् रामाचार्यः अस्य उल्लेखम् अत्र करोति। तदनुसारेण शतभिषा, पुष्यः, स्वाती , धनिष्ठा , एवं नक्षत्रेषु अथच पूर्वोक्तानि यानि चित्रादिनि नक्षत्राणि तेषु अपि जीर्णगृहे प्रवेशः शुभप्रदः वक्ति। तथैव ज्योतिषप्रकाशकारः अथच गृहप्रवेशकुसुमकारोऽपि तमेव मतम् अनुसरतः।

कालशुद्धिः विषयतु पूर्वम् उक्तं रामाचार्येण अथच गोविन्ददैवज्ञेन वशिष्ठादि मत वलात्। किन्तु असौ गोविन्दः स्पष्टयति यत् जीर्णगृहेषु यदि गृहप्रवेशं करोति कोऽपि तर्हि तत्र ये उक्ताः महादोषाः एकविंशति संख्यकाः तेषु अन्यतमः। यः गुरु आदि ग्रहाणाम् अस्तादिदोषः भवन्ति ते दोषाः न परिगणनीयाः अर्थात् तेषु दोषेषु सत्सु अपि जीर्णगृहे प्रवेशः विधेयः इति वदति गोविन्ददैवज्ञः। अत्र असौ ज्योतिप्रकाशस्य मतम् अपि उपस्थापयति तन् मतमपि ततः भिन्नं नास्ति। तत्रापि इदमेव मतम् अनुपालयति ज्योतिप्रकाशकारः। पुनश्च नवद्वन्दसौपूर्वियोः अर्थात् सुपूर्वं गृहं भवति अथच सुपूर्व गृहं अर्थात् कस्मिन्श्चित् पूर्वनिर्मितगृहं यदि कोऽपि प्रविशति चेत् तत् तु सुपूर्वगृहप्रवेशः। किन्तु यदि तादृशं गृहं विद्यते यस्य निर्माणं कृत्वा पुनश्च तस्य तत्र किमपि परिस्करणं च कारयित्वा यदि प्रविशति चेत् तदपि सुपूर्वगृहप्रवेशम्। एवंप्रकारेण द्विविधं सुपूर्वगृहप्रवेशः एकं तु तावत् यत्र पूर्वं गृहं विद्यते तत् गृहं कृत्वा तत्र प्रविशति। द्वितीयं तावत् गृहं विद्यते स्वस्यैवगृहं आत्मनः एव गृहं भवति परन्तु तत्रैव परिस्करणादिकं कृत्वा नूतनं कृत्वा पुनः तत्र प्रविशति इति एवं प्रकारेण सुपूर्वगृहेऽपि उभयत्वं दृश्यते। तर्हि सुपुर्वगृहप्रवेशकाले असौ वशिष्ठः वक्ति यत् कालशुद्धिः नापेक्षते। किन्तु यस्मिन् दिने प्रवेशनियमः तस्मिन् दिने तावत् पञ्चाङ्गशुद्धिः तत्र विचारणीया। नारदः वदति यत् यात्रानिवृत्ति प्रवेशात् यदि कोऽपि आगच्छति अर्थात्

30.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2

31.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.2

इदं यदि प्रथमप्रकारकं यत् सुपूर्वप्रवेशः अस्ति चेत् तत्र कालशुद्धिः अपेक्षिता अस्ति इति नारदस्यमतम्। अत्र इदं ध्येयम् यत् त्रिविधेऽपि प्रवेशे प्रवेशादिनीय नक्षत्रं क्रूरविद्धं वा तत्सर्वथा वर्ज्यम् इति।

**गृहप्रवेशात् पूर्वं वास्तुपूजने भूतबलिकरणे च विहितनक्षत्राणि –**

**मृदुध्रुवक्षिप्रचरेषु मूलभे वास्त्वर्च्चनं भूतबलिञ्च कारयेत्।**[32]

मृदूनि ध्रुवाणि क्षिप्राणि नक्षत्राणि प्रसिद्धानि मूलभं च। एषु सप्तदशसु भेषु नक्षत्रेषु वास्तोः वास्तुपुरुषस्यार्चनं भूतबलिं च कारयेत्। गृहपतिर्वास्तुपूजां कुर्यात्। पुरोहितो गृहपतिं वास्तुपूजादिकं कारयेत्। हक्रोरन्यतरस्याम् इत्यणौ कर्त्तुः कर्मत्वम्।

**यदाह ऋक्षोच्चयः -**

**चित्रा शतभिषा स्वाती हस्तः पुष्यः पुनर्वसुः।**
**रोहिणी रेवती मूलं श्रवमोत्तरफाल्गुनी॥**
**धनिष्ठा चोत्तराषाढा तथा भाद्रात्तरान्विता।**
**अश्विनी मृगशीर्ष च अनुराधा तथैव च ॥**
**वास्तुपूजनमेतेषु नक्षत्रेषु करोति यः।**
**स प्राप्नोति नरो लक्ष्मीमिति पिरीह पराशरः॥इति ॥**[33]

**अथ वास्तुपूजाप्रकारः-**

**निर्माणे मन्दिराणां च प्रवेशे त्रिविधेऽपि वा।**
**वास्तुपूजा तु कर्त्तव यस्मात्तां कथयम्यतः॥**
**गृहमध्ये हस्तमात्रं समान्तात्तण्डुलोपति।**
**एकाशीतिपदं कार्य तिलैस्तुल्यं सुशोभनम् ॥**
**एकद्वित्रिपदाः पञ्च चत्वारिशत्सुरार्चिताः।**
**द्वात्रिशद् बाह्यतो वक्ष्यमाणाश्चान्तस्त्रयोदश॥**
**तेषां स्थानानि नामानि वक्ष्यमीश्वरकोणतः।**
**तत्राग्निः शम्भुकोणस्थस्त्वसौ चैकपदेश्वरः।**
**तस्माद् द्वितीयः पर्जन्यश्चासावेकपदेश्वराः ।**
**जयन्तेन्द्रार्कसत्याख्या भृशश्च द्विपदेस्वराः।**
**आकाशवायू परतः क्रमादेकपदेश्वरौ।**
**एवं प्राच्यां नव ज्ञात्वा त्वेवमेवान्यदिक्षु च ॥**
**आद्याश्चान्त्यावेकपदौ द्विपदाः पञ्च पञ्च मध्यमगाः।**

32. मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.3

33.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.3

रोगादिदित्यन्तसुराः सप्त सौम्यदिशि क्रमात् ॥

तत्राधःस्थश्चतुष्कोणेष्वीशानादिषु च क्रमात्।

आपः सावित्रविजयरुद्रास्चैवपदेश्वराः॥

मध्ये नवपदो ब्रह्मा तस्यैशानादिकोणगाः।

आपवत्सोऽथ सविताविबुधाधिपसंज्ञकः॥

राजक्ष्मा च चत्वारः सुराश्चैकपदेश्वराः।

ब्रह्मणः पूर्वतो दिक्षु त्रिपदाश्चामरा अमी ॥

अर्यमा त विवस्वांश्च मित्रः पितृधरः क्रमात्।

स्वस्वस्थलेषु देवेषु स्थापितेष्वीदृशं भवेत् ॥

कोणेषु पञ्चमं चाव चतुर्थैकपदाः सुराः।

प्रागादिदिक्षु द्विपदाः पञ्च पञ्च यथाक्रमत्।

ब्रह्मणः पूर्वतो दिक्षु त्रिपदाः स्यपः समीपगाः।

हिरण्यरेताः पर्जन्यो जयन्तः पाकशासनः ॥

सूर्यः सत्यो भृशकाशौ वायुः पूषा च वै तथा।

गृहर्क्षतः पितृपतिर्गन्धर्वो भृङ्गराजकः ॥

मृगः पितृगणाधीशस्तथा दौवारिकाह्वयः।

सुग्रीवः पुष्पदन्तश्च जलाधीशो निशाचरः ॥

शौषः पापश्च रोगोहिर्मुको भल्लाट एव च।

सोमसर्पौदित्यदिती द्वात्रिंशदमराः स्मृताः ॥

आपश्चैवापवत्सवश्च जयो रन्ध्रस्तथैव च।

मध्ये नवपदो ब्रह्मा तस्थौ तस्य समीपगः ॥

प्राच्यां ह्यन्तरितादेवाः परितो ब्रह्मणः स्मृताः।

अर्यमा सविता चैव विवस्वान्विबुधाधिपः।

मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः  क्रमात्।

आपवत्सोऽष्टमः पञ्चचत्वारिंशत् सुरोत्तमाः॥

ज्ञात्वैवं स्थाननामानि बह्मणा सहितान्यसेत्।

वास्तुज्ञो वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः ॥

प्रणवेनार्चयोद्वापि अथवा स्वस्वनामभिः।

शुक्लवस्त्रयुगं दद्याद् धूपदीपफलैः सह ॥

अपूपैर्भूरि नैवेद्यैः सह समर्चयेत्।

**ताम्बूलं च ततो दद्याद् देवेभ्यश्च पृथक् - पृथक् ॥**

**दत्त्वा पुष्पाञ्जलिं कर्त्ता प्रार्थयेद्वास्तुपूरुषम्।**

**वास्तुमूर्त्ते नमस्तेऽस्तु भूमिशय्यारत प्रभो ॥**

**मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा।**

**इति प्रार्थ्य ततो दद्याद्दक्षिणामर्चकाय च ॥**

**विप्रेभ्यो भोजनं दत्वा स्वयं भुञ्जजीत बन्धुभिः।**

**एवं यः कुरुतो सम्यग्वास्तुपूजां प्रयत्नतः॥**

**आरोग्यं पुत्रपौत्रादि धनधान्यं लभेन्नरः।**

**वास्तुपूजामकृत्वा यः प्रविशेन्नवमन्दिरे।**

**रोगान्नानाविधान् क्लेशानश्नुते सर्वसङ्कटम् ॥**

**इति वसिष्ठसंहितायां वास्तुपूजाप्रकारः।**[34]

सम्प्रति गृहप्रवेशस्य कालं निर्धारयित्वा गृहप्रवेशपद्धतिं निरुपयन् रामाचार्यः आदौ वास्तुपूजनस्य भूतवलिकरणस्य च नक्षत्राणि वक्ति। तदनुसारेण मृदुसंज्ञकः , ध्रुवसंज्ञकः क्षिप्रसंज्ञकः एवं चरसंज्ञकनक्षत्रेषु अथच मूलनक्षत्रे वास्तुपूजनं भूतबलिं च कारयेत् जनः इति रामाचार्यः वक्ति। अमूम् एव मतं मुहुर्तकल्पद्रुमकारोऽपि स्वीकरोति असावपि एतान्येव नक्षत्राणि मृदुध्रुवक्षिप्रचरसंज्ञकनक्षत्राणि एव वास्तुपूजने भूतवलिकार्ये प्रशस्तानि इति वदति। अन्तरम् इदमेव यत् रामाचर्यस्तु एकम् अतिरिक्तं मूल नक्षत्रमपि स्वीकरोति न तत् मुहूर्त्तकल्पद्रुमकारः। अथच एतानि यानि नक्षत्राणि सन्ति वास्तुपूजनस्य तानि विश्वकर्मा विस्तरेण वक्ति यस्य उल्लेख मया अत्र क्रियते। एतेषु नक्षत्रेषु चित्रादिषु चित्रा , शतभिषा, स्वाती , हस्तः , पुष्यः , पुनर्वसुः , रोहिणी , रेवती , मूल , श्रवणादि नक्षत्रेषु यदि वास्तुपूजनं क्रियते चेत् विश्वकर्मा अत्र फलं वक्ति यत् असौ जनः लक्ष्मीं प्राप्नोति। धनमश्नुते इति एतेषु वास्तुपूजन नक्षत्रेषु यदि एतेषु कोऽपि वास्तु पूजनं विधदाति। तस्यैव उल्लेखः विस्तरेण गोविन्ददैवज्ञोऽपि करोति असौ पराशरस्य मतम् उपस्थापयति ऋक्षोच्चयः संज्ञक ज्योतिषग्रन्थे उपलख्यते। सम्प्रति तु अयं ग्रन्थः न उपलभ्यते परन्तु गोविन्दः वक्ति चेत् क्वचित् अयं ऋक्षोच्चयसंज्ञकः ग्रन्थोपि स्यात् तस्मिन् ग्रन्थे पराशरस्य मतम् अस्ति चेत् कदाचित् एवमपि वक्तुं शक्यते यत् अयमपि संकलन ग्रन्थः यत्र पूर्वाचार्याणां मतानि उल्लिखितानि सन्ति। तानि मतानि तर्हि नक्षत्र विषयाकानि अर्थात् नक्षत्राणां फलानि अत्र अस्मिन् ग्रन्थे उक्तानि सन्ति। तत्रापि विश्वकर्ममतमेव समं दृश्यते। यतोहि चित्रा , शतभिषा , स्वाती , हस्तः , पुष्यः , पुनर्वसुः प्रभृतिः नक्षत्रेषु यदि वास्तुपूजनं कोऽपि करोति चेत् लक्ष्मीं प्राप्नोति इति पराशरस्य मतम्। पराशरस्यमतम् एव अनुपालयति विश्वकर्मा अथच विश्वकर्मप्राकाशे एवं मुहूर्तचिन्तामणिकारश्च।

गृहप्रवेश पूर्वं वास्तुपूजनं करणीयमेव अतः तस्मिन् विषये इदानीं वदामि। गृहस्यमध्ये एकहत्सं चतुःपार्श्वे तण्डुलस्य उपरि एकाशीति पदं निर्मातव्यम्। तिलेन समानरुपेण सुशोभनं करणीयम्। पुनश्च प्रथमं द्वितीयं तृतीयं वा स्थानं पञ्चचत्वारिंशत् स्थानेषु देवानां पूजनं करणीयम्। द्वात्रिंशत् स्थानेषु बहिः अन्तिमः त्रयोदश स्थानेषु एवञ्च नाम्नः ईशानकोणे क्रमशः कथ्यते। ईशानकोणे अग्नेः स्थापनं करणीयम्। द्वितीयकोणे पर्जन्यस्य एवम् इन्द्रः तथा सूर्यः एवं सत्यः तथा भृशः इति एते पदानां स्वामी कथ्यते। पूनश्च आकाशं तथा वायुं क्रमशः एकपदस्य स्वामी कथ्यते। एवं रुपेण पूर्वदिशायां नवं

34.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.3

ज्ञात्वा नव एव अन्यदिशायाम् आदितः आन्तं यावत् एकपदम् द्विपदं तथा मध्यमे पञ्चमपूषा इति अष्टमतः यमस्य आन्तं यावत् देवातानां भागः दक्षिणदिशं यावत् कथ्यते। अष्टौ पितरः तथा यमान्तपश्चिमदिशायाः देवता आदितः आन्तं यावत् द्वयं द्वयम्  एकस्मिन् पदे एवञ्च पदद्वयमध्ये पञ्च एव स्थापनीयम्। रोगतः आरभ्य अन्तदेवतां यावत् उत्तरदिशायां क्रमशः स्थापनीयम्। यत्र च क्रमशः अधः कोणे ईशानादि कोणे पूजयितव्यम्। आपः सविता, जयः एवं इन्द्रः, रूद्रादि देवानाम् एकस्मिन् पदे स्थापयित्वा पूजयितव्यम्। मध्ये नव इति पद ब्रह्मणः भवति। अस्मिन् ईशानादिकोणेः गच्छति। आपवत्सः, सविता, इन्द्रः, तथा राजयक्ष्मा एतान् चतुरः देवान् एकपदस्थासं कथ्यते। अस्मिन् ब्रह्मा पूर्वदिशायाः तथा देवतानां त्रिपदं कथ्यते। अर्यमा, तथा विवस्वान् मित्रः एवं पृथ्वी गृहम् क्रमशः कथ्यते। स्वस्थाने देवान् स्थापयित्वा पञ्चकोणे एकस्मिन् पदे चतुर्न् देवान् स्थापयितव्यम्। पूर्वदिशायां पदद्वये तथा पञ्च पञ्च क्रमेण ब्रह्मणां पूर्वदिशायां तथा द्विपदानां समीपे स्थापनीयम्। ब्रह्मा पर्जन्यः जयन्तः इन्द्रः सूर्यः सत्यः भृशः,आकाशः, वायुः, तथा पूषनं क्रमशः स्थापनीयम्। गृहस्य नक्षत्रे यमराजः, गन्धर्वः, मृगराजः, मृगः,पितरः, गणाधीशः तथा द्वौरिकं स्थापयेत्। तथा सुग्रीवः, पुष्पदन्तः, जलाधीशः, निशाचरः, शेषः, पापः, रोगः, सुखः, एवं भल्लाटस्यापि स्थापनं कुर्यात्। सोमः, सर्पः, दितिः, अदितिः, तः द्वात्रिंशत् देवताः, पूज्याः उच्यन्ते। आपः एवम् आपवत्सः, जयः तथा रन्ध्रः अपि पूज्याः कथ्यन्ते। मध्ये नवमं पदं ब्रह्मणः एव भवति। तस्मिन् ब्रह्मभागे पूर्वादि क्रमेण एकम् अन्तरं कृत्वा चतुर्षु ब्रह्मणं देवः कथ्यते। अर्यमा सविता विवस्वान् एवं विबुधाधिपः मित्रः राजयक्ष्मा पृथ्वीधरः आपवत्सः एते अष्टौ देवतानां पूज्यः उच्यते। एतान् देवान् ब्रह्मणा सह नाम तथा स्थानं ज्ञात्वा वास्तोः मन्त्रेण गन्धपुष्पाक्षतादिभिः  ओम् उच्चारणपूर्वकम् अथवा तेषां देवतानां नामानुसारेण पूजनीयम्। श्वेतवस्त्रद्वयं दत्वा धूपदीप–फलादिभिः तथा च अपूपादिः नैवेद्यं मङ्गलवाद्यपूर्वकं समर्पयेत्। पुनश्च कर्त्ता पुष्पाञ्जलिं दत्वा वास्तुपुरुषं प्रार्थयेत्। ब्राह्मणः भोजयित्वा स्वयं परिजनैः सह भोजनं कुर्यात्। भूशय्यानिरतः आनन्दितः स्वामी वास्तुपुरुषः यजन्त प्रणमामि। मम गृहं धनधान्यादिभिः समृद्धं कुर्या यथाशक्ति दक्षिणां दद्यात्। यः एवं रुपेण प्रयत्न पूर्वकं वास्तुपूजां करोति सः मनुष्यः आरोग्यं पुत्रप्रोत्रादिनि तथा धनधान्यादीनि लभते। वास्तु पूजनं विना यः नूतनगृहं प्रविशति सः रोगान् क्लेशान् च प्राप्नोति तथा च सम्पूर्ण संकटं प्राप्नोतीति इति।

विशेषस्त्वन्य –संहिता – भ्योऽवसेयः। एवं भूतबलिरपि। उपक्रमोपसंहाररुपो वास्तुशान्तिपिरकारः प्रयोगरत्नादिनाम्नीषु स्व –स्वशाखाभेदेन भिन्नासु पद्धतिषु द्रष्टव्यः, ग्रन्थविस्तरभयान्नेह लिख्यत इत्यलमतिप्रसङ्गेन। केचित्तु पञ्चाङ्गशुद्धिमात्रयुक्ते पूर्वदिने एव वास्तुपूजामाहुः।

**यदाह नारदः –**

**विधाय पूर्वदिवसे वास्तुपूजाबलिक्रियाम् इति।**[35]

**श्रीपतिरपि –**

**अथ प्रवेशो नवमन्दिरस्य यात्रानिवृत्तावथ भूपतीनाम्।**
**सौम्यायने पूर्वदिने विधाय वास्त्वर्चनं भूतबलिं च सम्यक् ॥इति।**[36]

**एकाशीतिपदवास्तु**

35.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.3

36.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.3

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अग्नि:<br>1 | पर्जन्य:<br>1 | जयन्त:<br>1 | इन्द्र:<br>1 | सूर्य:<br>1 | सत्य:<br>1 | भृश:<br>1 | आकाश:<br>1 | अनिल:<br>1 |
| दिति:<br>1 | आप:<br>1 | जयन्त:<br>2 | इन्द्र:<br>2 | सूर्य:<br>2 | सत्य:<br>2 | भृश:<br>2 | सविता<br>1 | पूषा<br>2 |
| अदिति:<br>1 | अदिति:<br>1 | आपवत्स<br>1 | अर्यमा<br>1 | अर्यमा<br>2 | अर्यमा<br>3 | सवित:<br>1 | वितय<br>2 | वितय<br>1 |
| सर्प:<br>1 | सर्प:<br>2 | पृथ्वीधर:<br>1 | ब्रह्मा<br>1 | ब्रह्मा<br>2 | ब्रह्मा<br>3 | विवस्वान्<br>2 | गृहक्षत:<br>2 | गृहक्षत:<br>1 |
| सोम:<br>1 | सोम:<br>2 | पृथ्वीधर:<br>2 | ब्रह्मा<br>4 | ब्रह्मा<br>5 | ब्रह्मा<br>6 | विवस्वान्<br>2 | यम:<br>2 | यम:<br>2 |
| भल्लाट:<br>1 | भल्लाट:<br>2 | पृथ्वीधर:<br>3 | ब्रह्मा<br>7 | ब्रह्मा<br>8 | ब्रह्मा<br>9 | विवस्वान्<br>3 | गन्धर्व:<br>2 | गन्धर्व:<br>1 |
| मुख्य:<br>1 | मुख्य:<br>2 | राजयक्ष्मा<br>1 | मित्र:<br>1 | मित्र:<br>2 | मित्र:<br>3 | इन्द्र:<br>1 | भृङ्गराज:<br>2 | भृङ्गराज:<br>1 |
| नाग:<br>1 | रुद्र:<br>2 | शोष:<br>2 | असुर:<br>2 | वरुण:<br>2 | पुष्पदन्त:<br>2 | सुग्रीव:<br>2 | जय:<br>1 | मृग:<br>1 |
| रोग:<br>1 | पापयक्ष्मा<br>1 | शोष:<br>1 | असुर:<br>1 | वरुण:<br>1 | पुष्पदन्त:<br>1 | सुग्रीव:<br>1 | दौवारि:<br>1 | पिता<br>1 |

**गृहप्रवेशे लग्नशुद्धिः तिथिशुद्धिश्च**

**त्रिकोणकेन्द्रायधनत्रिगैः शुभैर्लग्ने त्रिषष्ठायगतैश्च पापकैः॥3॥**
**शुद्धाम्बुरन्ध्रे विजनुर्भमृत्यौ**
**व्यर्काररिक्तचरदर्शचैत्रे।**
**अग्नेऽम्बुपूर्ण कलशं द्विजांश्च कृत्वा**
**विशेद् वेश्म भकूटशुद्धम् ॥4॥**[37]

**पीयूषधारा –**

त्रिकोणेति। नवमपञ्चमचतुर्थसप्तमदशमैकादशद्वितीयतृतीयस्थाननामन्यताम –स्थानस्थैः शुभग्रहैरुपलक्षिति पूर्णचन्द्रबुधगुरुशुक्रैरूपलक्षिते। अत्र चन्द्रस्य लग्नराहित्ये ध्येयम्। तथा तृतीयषष्ठैकादशस्थैः पापग्रहैरूपलक्षिते तथा अम्बु चतुर्थस्थानं रन्ध्रमष्ठमस्थानं शुद्धे सर्वग्रहरहिते अम्बुरन्ध्रे यस्मिस्तादृशे लग्ने वेश्म गृहमाविशेत् ।

**यदाह वसिष्ठः -**

**केन्द्रत्रिकोणायधनत्रिसंस्थैः शुभैस्त्रिषष्ठायगतैः खलैश्च।**

37.मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.3-4

**लग्नान्त्यषष्ठाष्टमवर्जितेन चन्द्रेण लक्ष्मीनिलयः प्रवेश ॥**[38]

**अन्यच्च -**

**प्रवेशलग्नान्निधनस्थितो यः क्रूरग्रहः क्रूरेग्रहे यदि स्यात्।**

**प्रवेशकर्त्तारमथ त्रिवर्षाद्धन्त्यष्टवर्षैः शुभराशिगश्चेत् ॥इति।**[39]

**नारदः -**

**स्थिरलग्ने स्थिरे राशौ नैधने शुद्धिसंयुते।**

**त्रिकोणकेन्द्रखत्र्यायसौम्यैस्त्र्यायारिगैः परैः ॥**

**लग्नान्त्यार्यष्टमस्थानवर्जितेन हिमांशुना । इति।**[40]

प्रवेशः स्यादिति पूर्वेण सम्बन्धः।

**गुरुः -**

**सप्तमं शुद्धमुद्वाहे यात्रायामष्टमं तथा।**

**दशमं च गृहारम्भे चतुर्थं सन्निवेशने ॥इति।**[41]

**यत्तु श्रीपतिना -**

**केन्द्रच्छिद्रव्ययैः शुद्धैः क्रूरैः षट्त्र्यायगैर्गरौ।**

**लग्ने भृगौ वा केन्द्र वा स्थिरप्रायोदये विशेत् ॥ इति।**[42]

केन्द्रस्य शुद्धत्वमुक्तं तत्पापग्रहराशित्यकृतं ध्येयम्। लग्नस्थगुरुभृग्वोरूक्तिस्त्वतिप्राशस्त्याभिधानार्था। कीदृशे लग्ने विजनुर्भमृत्यौ भं राशिर्लग्नं च। जनुषि जन्मकाले भ् जनुर्भे ताभ्यां मृत्युरष्टमभवनं जनुर्भमृत्युः विगतो जनुर्भमृत्युर्यस्मिन् स्वजन्मलग्नात् स्वजन्मराशेर्वाष्टमो राशिः प्रवेशलग्नतो नापेक्षित इत्यर्थः। पुनः कीदृशः। व्यर्कारिरिक्ताचरदर्शचैत्रे। अर्कारौ प्रसिद्धौ वारौ। रिक्ताः - 4/9/14। उपलक्षणत्वाद्दग्धतिथयोऽपि। चरलग्नानि मेषकर्कतुलामकराः। उपलक्षणत्वात्तदंसा अपि। दर्शोऽमावास्या। चैत्रो मासः। उपलक्षणत्वादाषाढोऽपि। विगता अर्कादयो यस्मिन्। अर्कादय- प्रवेसादिने निषिद्धा इत्यर्थः।

**यदाह वसिष्ठः -**

**न नैधने भेपि न चाष्टलग्ने पञ्चेष्टकेऽप्यष्टमशुद्धियुक्ते।**

**कार्यः प्रवेशो न चरांसलग्ने शुभेक्षिते वाप्यथ संयुते वा ॥**

**रिक्तामममां दग्धतिथिं दिनेशभूसूनुषड्वर्गमिनेन्दुदृष्टिम्।**

**क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे ॥इति ॥**[43]

---

38.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

39.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

40.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

41.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

42.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

43.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

**वारफलानि गृहप्रवेशे -**

**वारफलमाप्याह स एव –**

**दह्यते प्रविशतां च मन्दिरं वह्निना नियतमेव वह्निभे।**

**ब्रध्नभूमिसुतवासरे तथा शीतरश्मिदिवसे हि वृद्धिदम् ॥**

**चन्द्रजार्यसितवासरेषु च श्रीकरं सुखमहार्थलाभदम्।**

**सूर्यसूनुदिवसे स्थिरप्रदं किन्तु चौरभयमत्र विद्यते ॥इति॥**[44]

**अन्यमतैः सह तुलना –**

**पूर्व कालामृतानुसारेण –**

**वारेऽर्कस्य सुदुःखदः कलहदः क्षीणेन्दुवारेऽर्थदः ,**

**पूर्णेन्दौ कुजवासरे दहनदः सौम्ये तु धान्यप्रदः।**

**जीवाहे पशुपुत्रदो भृगुदिने कल्याणसौख्यप्रदो ,**

**मन्दाहो स्थिरदश्च चोरभयदो वेश्मप्रवेशो भवेत् ॥42॥**[45]

**प्रवेश तिथ्यदिनिर्णयसङ्ग्रहः -**

**एषां निष्कृष्टमर्थमाह श्रीपतिः –**

**रिक्तातिथिर्भूसुतभानुवारौ निन्द्याश्च योगाःपरिवर्जनीयाः।**

**मेघः कुलीरो मकरस्तुला च त्याज्याः प्रवेशे हि तथा तदंशाः ॥इति।**[46]

**निषिद्धलग्नपलानि प्रवेशे -**

**निषिद्धलग्नफलायभिहितानि राजमर्त्तण्डे –**

**भूयो यात्रा मेषलग्ने प्रवेशे नाशं गच्छेत् कर्कटस्योदये वा।**

**व्याधिं तौलिन्याश्रिते लग्नवर्तिन्याकेकेरे चाप्नुयाद्धान्यनासम्।** [47]

**शुभाशुभानि लग्नानि तदंशाश्च -**

**लग्नेऽन्यत्रांशकेऽप्येषामेतद्दुष्टफलप्रदाः।**

**शुभान्यन्यानि लग्नानि प्रवेशे मुनयो विदुः॥इति।**[48]

अन्यानि स्थिराणि द्विस्वभावानि च।

**उक्तश्च वसिष्ठने -**

---

44.उद्धतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

45. पूर्वकालामृतम्,वास्तुप्रकरणम्, श्लो.सं.42

46.उद्धतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

47.उद्धतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

48.उद्धतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

**पञ्चाङ्गसंशुद्धदिने निशेशताराबले चाष्टकवर्गयपक्ते।**

**सौम्ये स्थिरे भे शुभदृष्टयुक्ते लग्नेऽथवा द्व्यङ्गगृहे विलग्ने ॥इति।**[49]

**विशेषो राजमार्त्तण्डे -**

**निन्दिता अपि शुभांशसमेतास्तौलिमेषमकराः सकुलीराः।**

**कर्तृभोपचयगाश्च विलग्ने राशयः शुभफलाय भवन्ति ॥**[50]

एतल्लग्नान्तराशुद्धौ बहुकालासहिष्णुत्वे वा द्रष्टव्यम्। शुांशाः वृषमिथुनकन्याधनुर्मीनानामंशा इत्यर्थः।

**कर्के तुलांशे सर्वथा प्रवेशनिषेधः -**

**कर्के तुलांशस्थे स्वरूपतो निषिद्धत्वाद्विशेषान्तरमाह वसिष्ठः -**

**यः क्षीणचन्द्रोऽन्त्यषडष्टसंस्थः पापेक्षितः पापयुतोऽथवा स्यात्।**

**कर्तुः स्त्रियं हन्ति स वत्सरेण त्रिवर्षतः सौम्यनिरीक्षितश्चेत् ॥इति।**[51]

अथ राज्ञां यात्रानिवृत्तिप्रवेशे विशेषो ध्येयः। यत्र मासे यात्रा कृता तस्मान्नवमे मासि यात्रादिनान्नवमे दिने वा प्रवेशो निषिद्धोऽस्ति।

**यदाह गुरुः -**

**निर्गमान्नवमे मासि प्रवेशो नैव शोभनः।**

**नवमे दिवसे चैव प्रवेशं नैवकारयेत् ॥इति।**[52]

वामं रविमिति। गृहप्रवेशसमये रविं सूर्य वामं यद्दिगभिमुखान् प्रवेश्य गृहग्वामभागस्थं कृत्वा वेश्म विशेत् तया पुरोऽग्रे स्वसम्मुखं पूर्णघटं जलपूर्ण कलसमुपलक्षणत्वात् पूगी - फलादि पूर्ण घटं वा कृत्वा। चकारस्यानुक्तसमुच्चयार्थत्वाद् ब्रह्मणांश्च सजलकलशा - नपि ब्रह्मणान्वाग्रे कृत्वा वेश्म विशेत्।

**प्रवेशसमये शुक्रस्य पृष्ठगतत्वमावश्यकम्**

**अत्र शुक्रः पृष्ठगः कार्य इत्यानुक्तोऽपि विशेषो ध्येयः।**

**यदाह वसिष्ठः –**

**कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान् पूज्यानग्रतः पूर्णकुम्भम्।**

**हर्म्यं रम्यं तोरणस्त्रग्वितानैः स्त्रीभिः स्त्रग्वी गीतामाल्यैर्विशेत् तत।इति।**[53]

**पृष्ठतो दक्षिणगत एव वा शुक्रस्य शुभदत्वं गुरुमतेन**

गुरुस्तु – वामगोऽग्रगो वा शुक्रो निषिद्धः, किन्तु पृष्ठगतो दक्षिणगतो वा शुभ इत्याह –

**पृष्ठगं दक्षिणं वापि भृगुं कृत्वा विशेत् सदा।**

---

49.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

50.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

51.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

52.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

53.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

**पुरोऽग्रं वामगं वापि शुक्रं कृत्वा विशेच्च न ॥इति॥**[54]

**शुक्रस्य दिक्चतुष्टये स्थितिरुक्ता**

अत्र शुक्रस्य दिक्चतष्टयस्थत्वज्ञानं चन्द्रवदेव ज्ञेयम्। विशेषानुक्तेः। तच्च गृहारम्भप्रकरणेऽस्माभिरुक्तम्।

**सर्ववर्णसाधारममुक्त्वा राज्ञां प्रवेशे विशेषविधयः**

अयंच सर्ववर्णानां त्रिविधेऽपि प्रवेशे विधिः। राज्ञां तु यात्रानिवृत्तौ विशेषमप्याह **श्रीपतिः**

**'कृत्वा विप्रान् सजलकलशांश्चाग्रतो वामतोऽर्कः स्नानः स्त्रग्वी विमल वसनो मङ्गलैर्वेदघोषैः।**

**व्यस्तैर्यात्राकथितशकुनैर्दारमार्गेण राजा हर्म्यं पुष्पप्रकररुचिरं तोरणाढ्यं विशेच्च' ॥इति॥**[55]

कीदृशं वेश्म। भकूटशुद्धं भकूटं षष्ठाष्टकादि तेन शुद्धं उपलक्षणत्वाद् विवाहप्रकरणोक्तं 'वर्णो वश्यं तथा तारा' इत्येवमादिकं च तेनाप् शुद्धं ध्येयम्।

**यदाह वशिष्ठः - 'राशिकूटादिकं सर्व दम्पत्योरिव चिन्तयेत् ' इति ॥**[56]

अत्र रामाचार्यः गृहप्रवेशाय लग्नशुद्धिं तिथिशुद्धिं वारशुद्धिं च विचारयति। आदौ लग्नशुद्धि प्रसङ्गे रामाचार्यः वक्ति यत् प्रथमः द्वितीयः तृतीयः चतुर्थः पञ्चमः सप्तमः नवमः दशमः एकादशः भावेषु यदि शुभग्रहाः स्युः एवम् अवशिष्टेषु त्रिषु भावेषु प्रायः षष्ठे अष्टमे अथच तृतीये व्येये अपि पापग्रहाः भवन्ति तर्हि लग्नं शुद्धं भवति। पुनश्च इदमपि वक्ति यत् अस्मिन् लग्ने अष्टमभावे चतुर्थभावे कोऽपि ग्रहः न स्यात् शुभः नस्यात् अशुभोपि न भवेत्। अस्यां स्थितौ पुनश्च कस्मात् इदं सर्वं विचार्यते तर्हिः वदति अर्थात् जन्मलग्नात् अथच जन्मराशेः इयं स्थितिः भवति चेत् लग्नशुद्धिः भवति। अग्रे असौ तिथिशुद्धिं वारशुद्धिं च विचारयति। इदं मतं विचारयामश्चेत् वस्तुतः वशिष्ठमतेन सममेव यतोहि वशिष्ठस्य मतम् उपस्थापयति अथच नारदस्य टीका पीयूषधाराकारः गोविन्दः। गोविन्देन उपस्थापिते मते वशिष्ठमते इदं स्पष्टमेव दृश्यते। यत् यन् मतं वशिष्ठस्य अस्ति पूर्वलिखितेषु भावेषु शुभग्रहाणां स्थिति विषयकम् अथच त्रिकस्थानेषु पापग्रहाणां स्थितिविषयकं तदेव साक्षात् अनुपालयति रामाचार्यः मुहूर्त्तचिन्तामणौ पुनश्च वशिष्ठस्तु तावत् तस्य फलम् अपि वृणुते। तदनुसारेण यदि अस्यां स्थितौ एतादृशे लग्ने यदि गृहं प्रविशति जनः तर्हिः लक्ष्मीं प्राप्नोति इति वशिष्ठः वदति। नारदः स्थिरः लग्नं विचारयति नारदः पुनश्च सः किम् वदति यत् स्थिरलग्ने अथवा स्थिरराशेः नवांशे यदि केन्द्रभावेषु अथच त्रिकोणभावेषु शुभग्रहाः स्युः एवं च आयभावे शुभग्रहः स्यात् अथच त्रिक् स्थाने आये एकादशे अशुभग्रहाः भवन्ति। अथच पुनः अत्रापि दृश्यते यत् लग्नात् षष्ठे अष्टमे च चन्द्रः न स्यात्। तर्हिः गृहं प्रविशेत् अनेन इदमपि सिद्ध्यति यत् नारदस्य इयं मतं तदेव कदाचित् वशिष्ठः अनुसरति उभयोः मतं परिशील्य रामाचार्योऽपि तदेव आप्तवचनं स्वीकरोति। पुनश्च गृहप्रवेशकुसुमग्रन्थे यदि पश्यामः चेत् तत्रापि प्रायः इयमेवस्थितिः यत् नारदं वदति अथच वशिष्ठः उभयोः सम्भूय अत्र मतम् उपस्थाप्यते कुसुमकारेण। असौ वक्ति यत् जन्मराशौ जन्मलग्ने तस्मात् उपचय भावेषु अथच स्थिरलग्ने गृहप्रवेशः शुभप्रदः भवति। एवमेव अशुभभावेषु चन्द्रस्य स्थितिः न स्यात् पापग्रहाः स्युः । तस्यां स्थितौ गृहप्रवेशो विधेयः इति प्रवेश कुसुमोकारोऽपि वदति।

---

54.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

55.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

56.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.4

गोविन्दः गुरुमतम् अपि प्रास्तौति अस्मिन् प्रसङ्गे वस्तुतः तत्र केवलं गोचर वशात् चन्द्रस्य कुत्रस्थितिः भवेत् इति शुभप्रदाः इति गुरुः वदति विविध कार्येषु। यदा विवाहकर्मणि चन्द्रः सप्तमे शुद्धः अथच यात्रायाम् अष्टमे गृहारम्भे दशमे एवं गृहप्रवेशे चतुर्थे चन्द्रः भवति चेत् शुभप्रदः इति गुरुः वक्ति। असौ गोविन्दः श्रीपतेः मतम् अपि उपस्थापयति। रत्नमालाः कारः श्रीपतिः अपि प्रायः प्राचीनाचार्यान् एव अनुसरति। तत्र केवलं कथनशैली भिन्ना विद्यते। यतोहि असौ वक्ति यत् केन्द्रे अथच अष्टमे भावे अथच द्वादशभावे शुभग्रहाः स्युः अशुभग्रहैः हिनाः एते भावाः अर्थात् शुभग्रहाः स्युः। अथच पापग्रहाः यदि भवन्ति चेत् कुत्र भवेयुः ते तर्हि असौ वदति यत् षष्ठे तृतीये एकादशे पापग्रहाः स्यु। एवं लग्ने गुरुः अथवा भृगुः स्यात्। अथच केन्द्रे गुरुः अथवा भृगुः भवेत्। अथवा स्थिरलग्ने गुरः अथवा शुक्रः भवति चेत् लग्नशुद्धिः गृहप्रवेशाय वक्ति श्रीपति।

अग्रे गोविन्दः वशिष्ठस्य मतम् उपस्थापयन् अशुभलग्ने अशुभकाले यदि गृहप्रवेशः क्रियते चेत् तस्य किम् फलम् इत्यपि वक्ति। एतदर्थम् असौ वशिष्ठस्य मतं पुनः स्थापयति यत्र वशिष्ठः वक्ति यत् प्रवेशकालिकलग्नात् यत् विद्यते तस्मात् अष्टमेभावे यदि क्रूरग्रहः स्यात् अथवा क्रूरगृहे लग्नं स्यात् अर्थात् लग्ने क्रूरग्रहस्य गृहं स्यात् राशिः स्यात् तर्हि अस्यां स्थितौ यदि प्रवेशः क्रियते चेत् वर्षत्रयात् अष्टवर्षाभ्यान्तरे प्रवेशकर्त्ता अशुभफलं प्राप्नोति नश्यति। अस्य मतं मया अन्यस्मिन् ग्रन्थे परिशीलितं तत्र विश्वकर्मापि प्रायः एवमेव वक्ति। सः अपि वदति यत् जन्मलग्नात् अथवा जन्मराशिः अष्टमे अथवा अष्टमांशे अष्टमलग्नं यत् विद्यते अत्र तु किञ्चित् भिन्नं विद्यते। सः वदति यत् प्रवेशकर्तुः यत् जातकम् अथवा जन्मलग्नं विद्यते अथवा या जन्मराशिः विद्यते तस्मात् अष्टमराशिः अथवा अष्टमलग्नं प्रवेशकालिकलग्नं न स्यात् । अथवा तस्यनवांशे न स्यात् नोचेत् असौ तु वक्ति यत् सर्वकर्माणि तत् त्याज्यम्। यतोहि न त्याज्यते चेत् तस्य जीवनं जीवितं दुर्लभं भवति अर्थात् सः कष्टेन सह जीवति इति असौ विश्वकर्मापि वक्ति।

पुनः अग्रे वशिष्ठः वक्ति यत् अष्टमराशौ यदि लग्नेशः भवति अथवा अष्टमेशः यदि लग्ने स्यात् अष्टमे लग्नेशः भवेत् प्रवेशकालिक लग्नं स्यात् अथवा प्रवेशकालिकलग्ने अष्टमेशः भवेत्। तर्हि अस्यां स्थितौ पञ्चेष्टलग्नसाधनेपि अष्टस्थानस्य अशुद्धिः वशात् अत्र प्रवेशः न करणीयः। यदा चरराशेः नवांशे अथच चरराशेः लग्नेऽपि प्रवेशः न करणीयः। तत्र शुभग्रहाः तं लग्नं पश्यन्ति तथापि अथवा शुभग्रहाः तत्र स्थिताः भवन्ति। तथापि चरलग्ने अथवा चरनवांशे गृहप्रवेशः न विधेयः इत्यपि वक्ति वशिष्ठः।

पुनः अग्रे असौ तिथिशुद्धिमपि विचारयति तिथिशुद्धिविषये अत्र मया पूर्वकालामृतस्यापि मतम् उपस्थाप्यते। पूर्वकालामृते इदमुच्यते यत् अष्टमभावः यदि सपापः भवति अथवा पापेन दुष्टः स्यात् एवञ्च पापग्रहः राशौ पापग्रहः स्थितः भवेत् चेत् एतादृशे लग्ने प्रवेशो न विधेयः। यदि प्रवेशः क्रियते चेत् गृहस्वामी वर्षाभ्यन्तरे एव अतुलनीयम् कष्टं प्राप्नोति। किन्तु यदि असौ पापग्रहः केनचित् शुभग्रहेण विक्षितः भवति चेत् प्रवेशात् चतुर्भिः वर्ष्येः असौ कष्टं विन्दति। अतः प्रवेशकालिकलग्न विचारण समये अष्टमभावे पापग्रहस्य स्थिति सर्वदैव ग्रहणीया त्याज्या च इति पूर्वकालामृतोकारोऽपि वक्ति।

लग्नशुद्धिः अनन्तरं वारशुद्धिं तिथिशुद्धिं च विचारयति रामाचार्यः। असौ वक्ति यत् मङ्गलवासरं सूर्यवासरं च त्यक्त्वा अन्येषु वारेषु गृहप्रवेशो विधेयः। अथच असौ वदति यत् तिथिषु रिक्तातिथि अर्थात् चतुर्थी, नवमी, चतुर्दशी एवं च अमावास्या एताः तिथयः त्याज्यः यतोहि अप्रशस्ताः अशुभाः भवन्ति। पुनश्च चैत्रमासम् अपि वदति यत् चैत्रमासे गृहप्रवेशः न करणीयः इति। अथच असौ इदमपि वक्ति यत् प्रवेश समये भकुटशुद्धिः अपि स्यात्। अस्यांस्थितौ प्रवेशः कथं विधेयः इत्यपि वक्ति रामाचार्यः यत् विस्तरेण मया अग्रेपि उपस्थाप्यते। एतन् मतम् उपस्थापयन् गोविन्दः एतत् श्रीपतेः मतम् उपस्थापयति। एवं वशिष्ठस्यापि मतं प्रस्तौति। राजमार्तण्डकारस्यापि अर्थात् भोजस्यापि मतम् असौ वृते। पुनः किञ्चित्

लग्नशुद्धिं विचारयन् गोविन्दाचार्यः पीयूषधारायां वक्ति वशिष्ठस्य मतं पुनः उपस्थापयति। तदनुसारेण पञ्चाङ्गशुद्धिं विचार्य दिने अथवा यदि तारावलं विद्यते चेत् रात्रौ शुभे अष्टकवर्गे शुभग्रहाणां स्थिरराशिषु स्थितत्वात् अथवा शुभग्रहैः लग्नं विक्षितं स्यात् किम् लग्नं तर्हि उच्यते द्विस्वभावलग्नम् अथवा स्थिरलग्नं तर्हि प्रवेशो विधेयः। अग्रे वशिष्ठः पुनः विशदयति यत् क्षीणेचन्द्रे, षष्ठे, अष्टमे, अथवा द्वादशे स्थिते सति अथवा पापग्रहैः युक्ते सति अथवा पापग्रहैः दृष्टेसति प्रवेशः यदि विधियते चेत् जातकस्य प्रवेशकर्तु स्त्री वर्षत्रयाभ्यन्तरे मृत्युमाप्नोति इति वशिष्ठः वदति। पुनः राजमार्तण्डकारोपि चरलग्नस्य फलं विस्तरेण वृते। राजमार्तण्डकारः किम् वक्ति। यत् असौ वस्तुतः निषिद्धः लग्नानां फलं विशदयति अतएव कदाचित् गोविन्दः अस्यां मतं प्रास्तोत। यतोहि अन्येषाम् आचार्याणां तथा विधं विशदतया चरलग्नेषु प्रवेशस्यफलं न उक्तं विद्यते। राजमार्तण्डकारः वदति यत् मेषलग्ने यदि प्रवेशं करोति चेत् नाशमाप्नोति अथवा कर्कटे। पुनः तुला चरलग्ने यदि प्रवेशं करोति चेत् व्याधिमाप्नोति अथच मकर अपि स्थिरलग्नं विद्यते तर्हि तस्मिन् मकरे स्थिरलग्ने यदि क्रियते चेत् धान्यनाशः भवति इति राजमार्तण्डकारः एवमुक्त्वा पुनः वक्ति यत् एतेषां लग्नानां नवांशेपि प्रवेशः न विधेयः। केवलं शुभग्रहैः युक्तानि यानि स्थिरलग्नानि अथवा द्विस्वभावलग्नानि स्युः तेषु एव गृहप्रवेशः शुभप्रदः इति राजमार्तण्डकारोपि वक्ति। तदैव मतं मया अग्रे स्थापितम्। विश्वकर्मप्रकाशेपि तदैव उच्यते यत् चन्द्रमा यदि त्रिक् स्थलेषु स्यात् अथवा क्षीणचन्द्रः लग्ने स्यात् तर्हि गृहप्रवेशात् वर्षाभ्यान्तरे एव भार्यायाः नाशः भवति। यदि अस्यां स्थितौ शुभग्रहस्यापि स्थिति तत्र विद्यते चेत् त्रिभिः वर्षैः भार्यायाः मृत्युः भवति इति विश्वकर्मप्रकाशे अपि तथैव अवलोक्यते। एवम् इदं वक्तुं शक्यते यत् वशिष्ठस्य यन् मतं विद्यते तदैव मतं राजमार्तण्डकारोपि अनुपालयति मुहूर्त्तचिन्तामणिकारः अपि अनुसरयति तदैव।

रामाचार्यः वारशुद्धिविषये अधिकं न वृते सः सङ्केतेनैव सक्षेपेणे वारस्य शुद्धिः वक्ति। यत् रविवासरं मङ्गलवासरं च हित्वा शुभाकांक्षिप्रवेशं कुर्यात् अनेन इदं स्वतः सिद्धं यत् अवशिष्ठेषु वारेषु गृहप्रवेशः प्रसस्तः। तदैव वशिष्ठं मतानुरोधेन गोविन्दः स्वटीकायां उपस्थापयति। वशिष्ठः वक्ति यत् रविवासरे अग्निभयं सोमवासरे वृद्धिः मङ्गलवासरे अग्निभयं बुधवासरे लक्ष्मीप्राप्तिः , गुरुवासरे पुत्रप्राप्तिः शुक्रवासरे धनलाभः अथच शनिवासरे स्थिरता चौरभयञ्च इति वशिष्ठः वक्ति। तद् यदि पूर्वकालामृतेन सह यदि तुलना क्रियते चेत् उभयत्र साम्यं दृश्यते। क्वचित् केवलं भावभेदः दृश्यते। यतोहि पूर्वकालामृतकारः रविवासरे दुःखदायी इति वदति तर्हिः अग्निभयं वशिष्ठः वदति चेत् तत्र अधिक अन्तरं नास्ति। अग्निभयं तु दुःखप्रदमेव। पुनश्च सोमवासरे किञ्चित् भिन्नता दृश्यते यतोहि वशिष्ठस्तु वृद्धिम् आदिशति। किन्तु असौ धनप्रदं तु वक्ति पूर्वकालामृतकारः किन्तु कलह प्रदमपि वक्ति। पुनः मङ्गलवासरे अपि भेदः न दृश्यते। अन्यत्र भेदः नास्ति किन्तु गुरुवासरे वशिष्ठः केवलं पुत्रप्राप्तिं वक्ति अथच पूर्वकालामृतकारः पशुः धनं विन्धति मानवः इत्यपि वदति। अनेन इदं सिध्यति यत् वशिष्ठस्यमतम् एव अत्रापि अनुपाल्यते परवर्तिभिः आचार्यैः।

श्रीपतिः अपि वक्ति यत् रिक्ता तिथिः गृहप्रवेशे त्याज्याभवति। पुनः श्रीपतिः भौमवारस्य रविवारस्य विन्ध्ययोगानां निन्दां करोति अथः श्रीपति मते वस्तुतः एकत्रैव तिथेः वारस्य च निर्देशः विद्यते यत् वारविशेषे अथच तिथि विशेषे गृहप्रवेशः न विधेयः।

गोविन्ददैवज्ञः स्वटीकायां शुक्रस्य अथच सूर्यस्य दिशाम् अपि वर्णयत्। असौ वक्ति यत् शुक्रः पृष्ठःगत स्यात् एवं सूर्यः वामगतः भवेत् यदा जनः प्रवेशं कुर्यात् तस्मिन् समये एतदर्थम् असौ वशिष्ठस्य अथच गुरोः मतम् उपस्थापयति। वशिष्ठः स्पष्टमेव वक्ति यत् शुक्रं पृष्ठेकृत्वा अथच सूर्यं वामतः कृत्येव यः प्रवेशकर्ता विद्यते सः व्राह्मणान् सम्पूज्य एवं पूर्णकलशं अग्रे संस्थाप्य मालावितानादिभिः शुशोभितं गृहं स्त्री गानादिभिः वाद्यादिध्वनिभिः सः प्रवेशं कुर्यात्। अत्र विशिष्ठम् इदमेव यत् शुक्रः पृष्ठे स्यात् एवं सूर्यः वामे स्यात्। इदमेव मतं गुरुपि वक्ति गुरुः कथयति यत् वामागोऽग्रगो वा शुक्रो निषिद्धः अर्थात् वामे अथवा अग्रे यदि शुक्रः भवति चेत् प्रवेशे अशुभत्वं जनयति। अस्य कः अभिप्रायः यत् पृष्ठगत अथवा

दक्षिणगत यदि शुक्रः भवति चेत् इदं शुभप्रदं तदैव सः श्लोके वक्ति गुरुः। मुहूर्त्तकल्पद्रुमेपि अस्य वर्णनं कथं प्रवेशः विधेयः इति अनुष्ठानस्य वर्णनं विद्यते तत्रापि इदमेव उच्यते येत् अम्वुपूर्णं कलशं हस्ते संस्थाप्य मन्त्रादिभिः शुभशकुनादिनाम् अवलोकनकृत्येव सहर्षं गृहं प्रविश्ये यजमानः। श्रीपतिः अपि तथैव वदति एतयोः अन्तरं न दृश्यते।

**गृहप्रवेशे गृहमुखवशेन वामरविविचारः**

पूर्णादितिथिवशेन पूर्वादिमुखगृहे प्रवेशस्य प्राशस्त्यञ्च –

**वामो रविर्मृत्युसुतार्थलाभतो -**
**ऽर्के पञ्चभे प्राग्वदनादिमन्दिरे।**
**पूर्णातिथौ प्राग्वदने गृहे शुभो**
**नन्दादिके याम्यजलोत्तराननेे ॥5॥**[57]

अथ वामागतार्कज्ञानं तिथिपरत्वेन पूर्वाद्यभिमुखगृहप्रवेश चेन्द्रवज्रयाऽऽह –

वाम इति। अष्टमपञ्चमद्वितीयैकादशस्थानेभ्यः पञ्चसु स्थानेषु स्थिते रवौ सति प्राग्वदनादिमन्दिरे प्रवेष्टव्ये गृहप्रवेशकर्तुर्वामो रविर्ज्ञेयः। तद्यथा यस्मिन् लग्ने प्रवेशः कर्तुमिष्यते तस्मादष्टमं यत्स्थानं तस्मात्पञ्चसु स्थानेषु अर्के स्थिते पूर्वाभिमुखमगृहप्रवेशकुर्वाणः सूर्यः स्यात्। तथा लग्नाद्यत् पञ्चमं स्थानं ततः पञ्चसु स्थानेषु अर्के स्थिते दक्षिणाभिमुखगृहप्रवेशकर्तुर्वाणः सूर्यः। एवं लग्नाद्यद् द्वितीयं स्थानं ततः पञ्चसु स्थानेषु सूर्य स्थिते उत्तराभिमुखगृहप्रवेसक्रुर्वामः सूर्य इत्यर्थः।

**उक्तञ्च -**

**रन्ध्रात् पुत्राद्धनादायात् पञ्चस्वर्के स्थिते क्रमात्।**
**पूर्वाशादिमुकं गेहं विशोद् वामो भवेद्यतः ॥इति।**[58]

**विश्वकर्माऽपि –**

**लग्नात्प्रागादितो दिक्षु द्वौ-द्वौ राशी नियोजयेत्।**
**एवमेकं न्यसेत्कोणे सूर्य वामे विचिन्तयेत् ॥ इति।**[59]

प्राच्यां लग्नात् द्वौ राशी स्थाप्यौ कोणे चैकः।

**गृहप्रवेशे गृहदिङ्मुखभेदेन भिन्नतिथयः**

पूर्णातिथाविति। प्राग्वदने पूर्वाभिमुखे गृहे पूर्णातिथौ पञ्चम्यां दशम्यां पूर्णिमायां वा प्रवेशः शुभः। नन्दादिके तिथिगणे याम्जलोत्तरानने गृहप्रवेशः शुभः। जलं पश्चिमदिक् तद्दिगभिमुखे भद्रायां द्वितीयायां सप्तम्यां द्वादश्यां वा प्रवेशः शुभः। उत्तराभिमुखगृहे जयायां तृतीयायामष्टम्यां त्रयोदश्यां वा प्रवेशः शुभ इत्यर्थः।

**यदाह गुरुः -**

**नन्दायां दक्षिणद्वारं भद्रायां पश्चिमामुखम्।**

---

57.मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.5

58.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.5

59.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.5

**जयायामुत्तरद्वारं पूर्णायां पूर्वतो मुखम् ॥इति।**[60]

**मुहूर्त्तकल्पद्रुमे -**

**रन्ध्रात्सुताच्चथा धनाश्च लाभात्।**
**पञ्चस्थितेऽर्के क्रमशो विशेच्च।**
**प्रागादिवक्त्रं सदनं यतः स्यात्।**
**वामो रविः पृष्ठसितः शुभाय॥7॥**[61]

येषां गृहाणां मुखं (मुख्यद्वारं) क्रमशः पूर्व-दक्षिण-पश्चिम-उत्तरदिक्षु भवति, तेषां क्रमशः गृहप्रवेशलग्नात् अष्टमस्थानतः पञ्चमस्थानतः द्वितीयस्थानतः एकादशस्थानतश्च पञ्च पञ्चराशिषु सूर्ये सति वामसंज्ञकः सूर्य इति कथ्यते। अर्थात् यदि पूर्वाभिमुखं गृहम् अस्ति तदा प्रवेशलग्नम् अष्टमः- नवमः- दशमः - एकादशः-द्वादशभावेषु सूर्ये सति वामो रविः ज्ञेयः। एवमेव यदि दक्षिणाभिमुखं गृहं स्यात्तदा प्रवेशलग्नतः पञ्चमः-षष्ठः-सप्तमः-अष्टमः-नवमभावेषु सूर्ये सति वामो रविः ज्ञेयः। पश्चिमाभिमुखे गृहे प्रवेशलग्नतः द्वितीयः-तृतीयः-चतुर्थः-पञ्चमः-षष्ठभावेषु सूर्ये सति वामरविः, तथैव उत्तराभिमुखे गृहे प्रवेशलग्नतः एकादशः-द्वादशः-प्रथमः-द्वितीयः-तृतीयः भावेषु सूर्ये सति वामरविः ज्ञेय। तत्र पूर्वाभिमुखे गृहे प्रवेशार्थं पूर्णातिथयः, पञ्चमी-दशमी-पूर्णिमातिथयः शुभदाः भवन्ति। एवमेव दक्षिणाभिमुखे गृहे प्रवेशार्थं नन्दा (1,6,11) तिथयः शुभाः भवन्ति। पश्चिमाभिमुखे गृहे प्रवेशार्थं भद्रा (2,7,12) तिथयः शुभाः भवन्ति। उत्तराभिमुखे गृहे प्रवेशार्थं जया (3,8,13) तिथयः शुभाः भवन्ति।

**वामरविचक्रम्**

| गृहमुखम् | पूर्वमुखम् | दक्षिणमुखम् | पश्चिममुखम् | उत्तरमुखम् |
|---|---|---|---|---|
| तिथयः | पूर्णा (5, 10, 15) | नन्दा (1, 6, 11) | भद्रा (2, 7, 12) | जया (3, 8, 13) |
| वामसूर्यः प्रवेशलग्नात् भावसंख्या | 8<br>9<br>10<br>11<br>12 | 5<br>6<br>7<br>8<br>9 | 2<br>3<br>4<br>5<br>6 | 11<br>12<br>1<br>2<br>3 |

**गृहप्रवेशे कलशवास्तुचक्रम्**

**वक्त्रे भू रविभात् प्रवेशसमये कुम्भेअग्निदाहः कृताः**
**प्राच्यामुद्वसनं कृता यमागता लाभःकृताः पश्चिमे।**

60.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.5

61. मुहूर्त्तकल्पद्रुमः, गृहप्रवेशकुसुमम्,श्लो.सं.7

**श्रीर्वेदा: कलिरूत्तरे युगमिता गर्भे विनाशो गुदे**
**रामा: स्थैर्यमत: स्थिरत्वमनला: कण्ठे भवेत् सर्वदा ॥6॥**[62]

**कलशस्याष्टधा विभागा: परिकल्प्या: –**

मुखं कण्ठो गर्भो गुदं चेति चत्वारो विभागा:, पूर्वादिदिक्परत्वेन च चत्वारो विभागा:। एवमष्टौ भागा: स्यु:। तत्र विभागपरत्वेन सूर्यभान्नक्षत्रन्यासे फलमुच्यते – वक्त्र इति। गृहप्रवेशसमये इति सर्वत्रापि सम्बध्यते। कुम्भे कलशाकृतौ वास्तुनि रविभात्सूर्याक्रान्तनक्षत्रादिति ल्यब्लोपे पञ्चमी। रविमारभ्य नक्षत्रन्यास इत्यर्थ:। तत्र कलशस्य वक्त्रे मुखे भूरेकं सूर्यनक्षत्रमेव स्थाप्यम्। तत्फलं गृह्याग्निदाह:। तत: सूर्यभात्कृता अग्रिमाणि चत्वारि भानि दक्षिणस्यां यमदिशि स्थाप्यानि फलं गृहपतेर्लाभो द्रव्यप्राप्ति:। ततो वेदा उत्तरे तदग्रिमाणि चत्वारि भानि पश्चिमायां स्थाप्यानि, फलं कलिर्लोकै: सह गृहसम्बन्धी निरर्थक: कलह: स्यात्। ततो युगमितास्ततोऽग्रिमाणि चत्वारि भानि गर्भे कलशमध्ये स्थाप्यानि। फलं विनाश:। कस्येत्याकाङ्क्षायां गर्भोपादानाद्भाविनां गर्भणां विनाश इत्यर्थ:। ततो रामस्तदग्रिमाणि त्रीणि भानि गुदे बुध्न्ये स्थाप्यानि फलं स्थैर्यं गृहपतेर्बहुकालं तत्र गृहे निवास:। ततोऽनलास्तदग्रिमाणि त्रीणि भानि कण्ठे स्थाप्यानि, फलं स्थिरत्वं सर्वदा गृहपतेर्भवेत्। एवमभिजिद्रहितानि सप्तविंशकिभानि स्यु:।

**कलशवास्तुचक्रे नक्षत्रसन्निवेशप्रकारस्तत्फलानि च -**

**तदुक्तं विश्वकर्मणा –**

**घटाकारं लिखेच्चक्रं रविधिष्ण्यक्रमेण च।**
**मुखैकं दिक्षु चत्वारि त्रिस्त्रीणि गुदकण्ठयो:।**
**एवं चक्रं समालेख्यं प्रवेशार्थं सदा बुधै: ॥**[63]

अत्र चत्वारि इति वीप्सा द्रष्टव्या, दिक्षु इत्यनेन गर्भोऽप्युपलक्षते।

**तथा च फलनिर्देशस्तत्रैव –**

**अग्निनाशो मुखे प्रोक्त उद्वास: पूर्वतो भवेत्।**
**दक्षिणे चार्थलाभाय पश्चिमे श्रपीपदो भवेत् ॥**
**उत्तरे कलशस्य प्रकीर्तिता ॥ इति।**

**ज्योति:प्रकाशेऽपि –**

**'भूर्वेदपञ्चकं त्रिस्त्रि: 1/4/4/4/4/4/3/3 प्रवेशो कलशोऽर्कभात्।**
**मृतिर्गतिर्धनं श्री: स्याद् वैरं शुक् स्थिरतां सुखम्' ॥ इति।**[64]

वेदपञ्चकं वेदाश्चत्वारस्तेषां पञ्चकं पञ्चवारम्। चत्वारि भानि लेख्यानीत्यर्थ:। मृतिरित्यादीन्यष्टौ यथासङ्ख्यं फलानि।

**तत्र निष्कृष्टार्थ: कलशवास्तुचक्रे**

---

62. मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.6

63.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.6

64.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.6

अत्र कलशचक्रे शुभपलस्थाने याते सत्येव विहितनक्षत्राणां परिग्रहो युक्तः। तत्रापि यद्दिङ्मुखे प्रवेशे विधित्सिते ताद्दिङ्मुखविहितनक्षत्रपरिग्रहः। यथा पूर्वदिङ्मुखगृहप्रवेशे विधित्सिते रोहिणीमृगे ग्राह्ये, दक्षिणाभिमुखगृहप्रवेशे उत्तराफाल्गुनीचित्रे, एवं पश्चिमाभिमुखे अनुराधोत्तराषाढे, एवमुत्तराभिमुखे उत्तराभाद्रपदारेवत्यौ ग्राह्ये इति निष्कृष्टोऽर्थः।

**अत एवोक्तं वसिष्ठेन -**

**यद्दिग्दारं मन्दिरं तद्दिगर्क्षैरुक्तर्क्षैः स्यात् सन्निवेशो न सर्वैः। इति।**[65]

तद्दिगर्क्षैरिति उक्तर्क्षैरिति चानयोः समानाधिकरण्येनान्वयः। भिन्नवाक्यत्वे तु विवक्षिते चकारः कर्त्तव्यः। 'सम्भवत्येकवाक्यत्वे वाक्यभेदो हि दूषणम्' इति न्यायाच्च। अत एव –

**अर्कानिलेयादितिस्त्रविष्णुऋक्षे प्रविष्टं नवमन्दिरं यत्।**

**अब्दत्रयात् तत्परहस्तयातं शेषेषु धिष्ण्येषु च मृतयुदं स्यात्'॥इति**[66]

निषेधोऽप्युपपन्नो भवति ॥

**अन्य मतैः सह तुलना –**

**पूर्व कालामृतानुसारेण –**

**चक्रं स्यात्कलशस्वरुपमथ तत् संलिख्य मूर्ध्न्येकभं,**

**प्रागाद्यासु चतुश्चतुः प्रतिदिशं चत्वारि तन्मध्यमे।**

**कण्ठे त्रीणि गुदे त्रयं च विलिखेद् भानां क्रमात् तत्फलं,**

**वक्ष्येऽर्कान्वित भादितश्च गणयेत्संवेशधिष्ण्यान्ततः ॥55॥**

**शीर्षेछेदमथप्रवासमभयं धान्यं ततो निर्धनं,**

**गर्भस्त्रावमथ श्रियं गृहपतेर्दद्याच्छतायुः सदा।**

**संग्रामाशिलदुर्गशैलनगरप्रासाददेवालय-**

**क्षक्षेत्रारामगृहप्रवेशसमये ज्ञेयं चक्रं त्विदम् ॥56॥**[67]

**मुहूर्तकल्पद्रुमे -**

**प्रवेशकलशे चक्रे सूर्यभाच्छरदन्तिनः।**

**गजषड्भानि गदितान्यशुभानि शुभानि च ॥**[68]

**ज्योतिर्निबंधे –**

**प्रवेशे कलशेर्कर्क्षात्पञ्चनागाष्टषट् क्रमात्।**

**अशुभं च शुभं ज्ञेयमशुभं च शुभं तथा ॥**[69]

---

65.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.6

66.उद्धृतं,मु.चि,पीयूषधाराटीका,गृहप्रवेशप्रकरणम्,श्लो.सं.6

67.पूर्वकालामृतम्,वास्तुप्रकरणम्,श्लो.सं.55–56

68. मुहूर्त्तकल्पद्रुमः, गृहप्रवेशाकुसुमम्,श्लो.सं.8

प्रवेशकाले नक्षत्रस्य शुभाशुभज्ञानाय सूर्यनक्षत्रतः चन्द्रनक्षत्रं यावत् गणयित्वा कुम्भचक्रस्य निर्माणं क्रियते। अर्थात् प्रवेशकालिकलग्नचक्रे सूर्यचन्द्रौ कस्मिन् नक्षत्रे स्थितौ स्तः इति द्रष्टव्यं भवति। तत्र कुम्भचक्रे घटस्य मुखाद्यवयवानां चिन्तनमपि भवति। तद्यथा यदि सूर्यनक्षत्रात् चन्द्रनक्षत्रं प्रथमं नक्षत्रं भवति। अर्थात् सूर्यनक्षत्रमेव गृहप्रवेशस्य चन्द्रनक्षत्रं स्यात्तदा नक्षत्रं घटस्य मुखे चिन्तयेत्। तस्य फलम् अग्निदाहो भवति। तदग्रिमानि चत्वारि नक्षत्राणि घटस्य पूर्वे चिन्तयेत्, तस्य फलं प्रवासः स्यात्। तदनन्तरं चत्वारि नक्षत्राणि (सूर्यनक्षत्रः चन्द्रनक्षत्रं यदि षड्संख्यातः नव संख्यां यावत् स्यात्तदा) घटस्य दक्षिणभागे कल्पयेत्, तस्य फलं लाभः। ततः अग्रिमचत्वारि नक्षत्राणि (दशसंख्यातः त्रयोदशसंख्यां यावत्) कुम्भस्य पश्चिमे कल्पयेत् तत्र प्रवेशनक्षत्रे सति धनप्राप्तिं विजानीयात्। तदग्रिमचत्वारि नक्षत्राणि (यदि सूर्यनक्षत्रतः चन्द्रनक्षत्रं यदि चतुर्दशसंख्यातः सप्तदशसंख्यामध्ये स्यात्तदा) कुम्भस्योदरे चिन्तयेत् यस्य फलं गृहविनाशः भवेत्। कुम्भस्य गुदाभागे (निम्नस्थाने) तदग्रिमाणि नक्षत्राणि कल्पयेत्। तत्र प्रवेशनक्षत्रे सति फलं गृहस्य स्थिरत्वं भवति , कुम्भस्य कण्ठे तदग्रिमाणि त्रीणि नक्षत्राणि परिकल्पयेत्। तत्र प्रवेशनक्षत्रे सति नित्यं गृहस्य स्थैर्यं जानीयादिति भावः।

**सन्दर्भग्रन्थसूची**


1. वशिष्ठसंहिता, डा. गिरिजाशङ्करशास्त्री,ज्योतिषकर्मकाण्डआध्यात्म शोध संस्थान, प्रयाग, सं-2006
2. मुहूर्तचिन्तामणिः, डा.रामचन्द्रपाठकः,चौखम्वा सरभारती प्रकाशन,वारणासी, संस्करणम्-2006
3. वैदिकज्योतिष, गिरिजाशंकरशास्त्री,चौखम्बा सुरभारती प्रकाशन,वाराणासी, संस्करणम्-2007
4. वृहतपराशरहोराशास्त्रम्,पं देवचन्द्रझा,चौखम्बा सुरभारती प्रकाशन, वाराणासी, संस्करणम्-2000
5. ज्योतिष शास्त्रसेतिहास, आचार्य लोकमणिदाहलः,चौखम्बा सुरभारती प्रकाशन, वाराणासी, सं-2009
6. मुहूर्तचिन्तामणिः, श्री विन्ध्येश्वरीप्रसादद्विवेदी,चौखम्बा सुरभारती प्रकाशन, वाराणासी, संस्करणम्-2011
7. फलित दर्पण, राधेश्याम शर्मा, भारतीय पुस्तक मन्दीर, हरिद्वार : 2008
8. वास्तुप्रबोधिनी, डॉ.अशोकथपलियाल, अमर ग्रन्थ पब्लिकेशन्स, दिल्ली, संस्करण - 2011
9. भारतीय वास्तुशास्त्र परिचय-पाठ्यक्रम, सम्पादक-प्रो.वेम्पटिकुटुम्बशास्त्री,रा.सं.सं. नईदिल्ली, सं.2007
10. वास्तु चिन्तामणि, प्रो.आर्यभूषणशुक्ल, भारतीय ज्योतिष विज्ञान परिषद्, नोडया, उ.प्र. सं.2022


69. ज्योतिर्निबंध,पृ.सं.167